॥ ॥ श्रीमद्भगवद्गीताभाष्यमूलं ॥ ॥

श्रीवेदव्यासाय नमः ॥ माध्वाय नमः ॥ देवं नारायणं नत्वा सर्वदोषविवर्जितं परि
॥१॥ पूर्णं गुरूंश्चान्यान् गीतार्थं वक्ष्यामि लेशतः ॥१॥ नष्टधर्मज्ञाने लोके कृपालुभिर्ब्रह्मरुद्रेन्द्रा
दिभिरर्थितो ज्ञानप्रदर्शनाय भगवान् व्यासोऽवततार ॥ ततश्चेष्टानिष्टप्राप्तिपरिहारेच्छूना
| धनादर्शिनां वेदार्थाज्ञानाच्च संसारे क्लिश्यमानानां वेदानधिकारिणां स्त्रीशूद्रादीनां च ज्ञानद्वारा धर्म
मोक्षः स्यादिति कृपालुः सर्ववेदाद्यर्थोपबृंहितां तदनुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्तां च स
र्वप्राणिनामवगाह्यानवगाह्यरूपां केवलभगवत्स्वरूपपरापरोक्षार्थां महाभारतसंहितामच
चीकॢपत् ॥ तच्चोक्तं ॥ लोकेशा ब्रह्मरुद्राद्याः संसारे क्लेशिनं जनं ॥ वेदार्थे समधीकारवर्जितं स्त्रि
यादिकं ॥ अवेक्ष्य प्रार्थयामासुर्देवेशं पुरुषोत्तमं ॥ ततः प्रसन्नो भगवान् व्यासो भूत्वा स तेन च ॥
अन्यावताररूपैश्च वेदानुक्तार्थभाषितं ॥ केवलेनात्मबोधेन दृष्टं वेदार्थसंयुतं ॥ वेदादपि प
रं चक्रे पंचमं वेदमुत्तमं ॥ भारतं पंचरात्रं च मूलरामायणं तथा ॥ पुराणं भागवतं चेति संभिन्नः ॥१॥
शास्त्रपुंगवः इति नारायणाष्टाक्षरकल्पे ॥ ब्रह्मापि तन्न जानाति ईषत्सर्वेऽपि जानते ॥ बह्वर्थ

ऋषयस्तानुभारतं प्रवदंतिही सुपनारदीये॥ ब्रह्माद्यैः प्रार्थितो विष्णुर्भारतं संचकार ह॥ य
स्मिन्दशार्थाः सर्वत्र नज्ञेयाः सर्वजंतुभिरिति नारदीये॥ भारतं चापि रुतवान्पंचमं वेदमुत्त
मं॥ दशार्थं सार्थं सर्वत्र केवलं विष्णुबोधकं॥ परोक्षार्थं तु सर्वत्र वेदाद प्युत्तमं तु यदि
तिस्कांदे॥ यदिविद्याच्चतुर्वेदान् सांगोपनिषदान्द्विजः॥ न चेत्पुराणं संविद्यान्नैव
सस्याद्विचक्षणः॥ इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्॥ बिभेत्यल्पश्रुताद्वे
दो मामयं प्रचलिष्यति॥ मन्वादिकेचिद्ब्रुवते ह्यास्तिकादितथापरे॥ तथोपरि
चराद्यन्ये भारतं परिचक्षते॥ महत्वाद्भारवत्वाच्च महाभारतमुच्यते॥ निरुक्त
मस्य यो वेद सर्वपापैः प्रमुच्यते॥ यदिहास्ति तदन्यत्र यन्नेहास्ति न कुत्रचित्॥
कौ
विराटोद्योगसारत्वा नित्यादि तद्वाक्यपर्यालोचनया ऋषिसंप्रदायात्॥ कौ
द्यान्यः पुंडरीकाक्षान्महाभारत रुद्भवेदित्यादि पुराणगत ग्रंथांतर वाक्य
न्यथानुपपत्ता॥ नारदाध्ययनादिलिंगैश्चावसीयते॥ कथमन्यथा भार

(भारतं सर्ववेदाश्च तुलामारोपिताः पुरा॥ देवैर्ब्रह्मादिभिः सर्वैः ऋषिभिश्च समन्वितैः॥ व्यासस्यैवाज्ञया
तत्रात्यरिच्यत भारतं॥+७

ज्ञान
शब्द तैर्निरुक्तिमात्रेण सर्वेषां पक्षयः॥ प्रसिद्धस्य सोर्थः॥ कथं चान्यस्य न कर्त्तुं शक्य
॥२॥ ते॥ यथा तरंगततबाह्य नाविद्यमानस्तुतिः॥ न चक्रलुरेव॥ इतरत्रापि साम्यात्तु॥
तत्र च सर्वसारतार्थसंग्रहं वासुदेवार्जुनसंवादरूपं भारतपारिजात मधु
सुप भूतां गीतां निबबंध॥ तथोक्तं॥ सारं सर्वशास्त्रेषु भारते गीतिका वरा॥ विष्णोः
८ सहस्रनामापि ज्ञेयं पाठ्यं च तद्द्वयमिति कौर्मे॥ सहि धर्मः सुपयोप्यो ब्रह्मणोपि पदवेद
नाइति च॥ तत्र सेनयोर्मध्ये बांधवादि मोहजालसंरतं विषीदंतमर्जुनं भगवाननुवा
च॥ प्रज्ञावादान्स्वमनीषोत्थवचनानि॥ कथमशोच्याः॥ गतासूं किमिति॥ नत्वेवा न्र।
६ हं नीश्वरानित्यत्वस्याप्रस्तुतत्वाद्दृष्टांतत्वेनाहं॥ नत्वेवेति॥ यथाहं नित्यः सर्ववेदांतेषु
प्रसिद्धः॥ एवं त्वमेतज्जनाधिपाश्च नित्याः॥ देहिनोस्मिन्व पुषि तद्भवति॥ तदेवासिद्ध ॥२॥
मिति चेन्न॥ देहिनोस्मिन्यथा कौमारादि शरीरभेदेपि देहीतदीक्षिता सिद्धः॥ एवं

स्य देहांतरप्राप्तावपीक्षितत्वात् ॥ नहि जडशरीरस्य कौमाराद्यनुभवः संभवति ॥ मृतस्यादर्श
नात् ॥ मृतस्य वाय्वाद्युपगमाद्यनुभवाभावः ॥ अहं मनुष्य इत्यनुभवाच्चैतत्सिद्धमिति चेन्न ॥ स घ
र्ये वा विशेषदेहे सुप्यादौ ज्ञानादिविशेषादर्शनात् ॥ समस्ताभिमानो मनसि ॥ काष्ठादिवत् ॥ श्रुते
श्च ॥ प्रामाण्यं च प्रत्यक्षादिवत् ॥ न च बौद्धादिवत् ॥ अपौरुषेयत्वात् ॥ न ह्यपौरुषेये पौरुषेया ज्ञाना
दयः कल्पयितुं शक्याः ॥ विना चैकस्य सिद्धावस्यापौरुषेयत्वं ॥ सर्वसमयाभिमतधर्मासिद्धेः ॥ य
श्चतो नांगीकुरुते नासौ समयी ॥ अप्रयोजकत्वात् ॥ मास्तु धर्मो निरूप्यत्वाच्चेदिति चेन्न ॥ सर्वाभि
मतस्य प्रमाणं विना निषेद्धुमशक्यत्वात् ॥ न च सिद्धिरप्रामाणिकस्येति चेन्न ॥ सर्वाभिमतत्वे
च प्रमाणत्वात् ॥ अन्यथा सर्वव्यावृत्तिकल्पवेदारासिद्धेश्च ॥ न च मयाश्रुतमिति तल्लवज्ञातुं शक्यं ॥
अन्यथा वा प्रत्युत्तरं स्यात् ॥ भ्रांतिर्वीतत्वस्यात् ॥ सर्वदुःखकारणत्वं वा स्यात् ॥ एको वान्यथास्या
त् ॥ रचितत्वे च धर्मप्रमाणस्य कर्तुरज्ञानादिदोषशंका स्यात् ॥ न चादोषत्वं स्ववाक्येनैव सि
ध्यति ॥ न च येन केनचिदपौरुषेयमित्युक्तमुक्तवाक्यसमं ॥ अनादिकालपरिग्रहसिद्धत्वात् ॥
अतः प्रामाण्यं श्रुतेः ॥ अतः कुतर्कैर्धीरैस्तत्र न मुह्यति ॥ अथवा जीवनाशं देहनाशं वाऽपेक्ष्य शो

कः ॥ न तावज्जीवनाशं नित्यत्वादित्याह ॥ न त्वेवेति ॥ नापि देहनाशमित्याह ॥ देहिन इति ॥ यथा कौ
॥२॥ दे मारादिदेहहानेन जरादिप्राप्तावशोकः ॥ एवं जीर्णादिदेहहानेन देहांतरप्राप्तावपि ॥ तथापि त
द्दर्शनाभावादिना शोकः इति चेन्नेत्याह ॥ मात्रास्पर्शा इति ॥ मीयंत इति मात्रा विषयास्तेषां स्पर्शाः सं
3 बंधाः ॥ ते एव शीतोष्णसुखदुःखदाः ॥ देहे शीतोष्णादिसंबंधा हि शीतोष्णाद्यनुभवः आत्मनस्तत
श्च सुखदुःखे ॥ न ह्यात्मनः स्वतो दुःखादिः संभवति ॥ कुतः ॥ आगमापायित्वात् ॥ यद्यात्मनः स्व
तः स्युः सुषुप्तावपि स्युः ॥ अतो यतो मात्रास्पर्शा जाग्रदादावेव वर्तते संति नान्यदैवेति तदन्वयव्यति
रेकित्वात्तन्निमित्ता एव नात्मनः स्वतःसिद्धाः ॥ आत्मनश्च तैर्विषयविषयिभावसंबंधादन्यः संबंधो
नास्ति ॥ न चागमापायित्वेपि प्रवाहरूपेणापि नित्यत्वमस्ति ॥ सुषुप्तिप्रलयादावभावादित्याह ॥ अनि
त्या इति ॥ अतश्चात्मना देहाध्यासभ्रम एव सुखदुःखकारणं ॥ अतस्तद्धि मुक्तस्य बंधुमरणादि
दुःखं न भवति ॥ अतो मिथ्याभिमानं परित्यज्य तान् शीतोष्णादीन् तितिक्षस्व ॥ अतः प्रयोजनमा ॥३॥
ह ॥ यं हीति ॥ यमेते मात्रास्पर्शा न व्यथयंति ॥ परिणाममेवसंतं ॥ शरीरसंबंधाभावे सर्वेषा
मपि व्यथाभावात् पुरुषमिति विशेषणं ॥ कथं न व्यथयंति ॥ समदुःखसुखत्वात् ॥ तत्कथं ॥ धै

श्री

येण॥ नित्य आत्मेत्युक्तं॥ किमात्मैव नित्यः॥ अहोस्विदन्यदपि॥ अन्यदपि तत्किमित्यत्राह॥ ना
सत इति॥ असतः कारणस्य सतो ब्रह्मणश्चाभावो न विद्यते॥ प्रकृतिः पुरुषश्चैव नित्यौ कालश्च स
त्तमेति वचनात् श्रीविष्णुपुराणे॥ पृथग्विद्यत इत्यादरार्थः॥ असतः कारणत्वं च॥ सदसद्रूपयास
सोगुणमय्या गुणो विभुरिति वै भागवते॥ असतः सदजायतेति च॥ अव्यक्तं च॥ संप्रदायतश्चै
तत्सिद्धमित्याह॥ उभयोरिति॥ अंतो निर्णयः॥ किं बहुना॥ यद्देशतो नित्यं तन्नित्यमेव॥ वेदाद्य
न्यदपीत्याह॥ अविनाशीति॥ नापि शापादिना विनाश इत्याह॥ विनाशमिति॥ अव्ययं स्वतो व
तु देहस्यापि कस्यचिन्नित्यत्वमिति नेत्याह॥ अंतवंत इति॥ अस्तु तर्हि दर्पणनाशात्प्रतिबिंब
नाशवदात्मनाश इत्यत आह॥ नित्यस्येति॥ शरीरिण ईश्वरयोरुक्तये॥ न च नैमित्तिकनाश
इत्याह॥ अविनाशिन इति॥ कुत अप्रमेयस्वरूपत्वात्॥ न ह्युपाधिबिंबसान्निध्यनाशे प्रति
बिंबनाशः॥ सति च प्रदर्शके॥ स्वयमेवात्र प्रदर्शकः॥ चित्वात्॥ नित्यश्चोपाधिः कश्चिदस्ति॥ प्र
तिपत्तो विमोक्षस्य नित्योपाध्या स्वरूपया॥ चिद्रूपया युतो जीवः केशवप्रतिबिंबक इति सगव

त्वा भ

दर्शनात्॥ व्यवहारस्तु भ्रांत इत्याह॥ य एनमिति॥ कुतः॥ उक्तहेतुभ्यो नायं हंति न हन्यते॥ नहि
॥४॥ प्रतिबिंबस्य क्रिया॥ स हि बिंबक्रिययैव क्रियावान्॥ ध्यायतीवेश्रुतेश्च॥ अत्र मंत्रवर्णोप्य ति
स्तीत्याह॥ न जायत इति॥ न वेश्वरज्ञानवद्भूत्वाभविता॥ नहि तद्देशतः॥ देशतः कालतो
५ यो सावववस्तुतः स्वतोन्यतः॥ अविलुप्तावबोधात्मेत्यादिश्रुतिस्मृतिसिद्धं॥ कुतः॥ अजा
दिलक्षणेश्वरस्वरूपत्वात्॥ शाश्वतः सदैकरूपः॥ पुरं देहं मणंतीति पुराणः॥ तथापि न हन्य व
ते हन्यमानेपि देहे॥ अतो य एवं वेद स कथं कं घातयति हंति वा॥ अविनाशिनं नैमित्तिक
[redacted] नाशरहितं॥ नित्यं स्वाभाविकविनाशरहितं॥ अथवाऽविनाशिनं दोषयोगरहितं नित्यं सदा
भाविनमिति सर्वत्र विवेकः॥ दोषयुक्तपुरुषादिषु नष्टशब्दप्रयोगदर्शनात्॥ देहात्मविवेका
नुभवार्थं दृष्टांतमाह॥ वासांसीति॥ स्वतः प्रायो निमित्तैश्चाविनाशिनोपि केनचिन्निमित्तविशे ॥४॥
षेण स्यात् क कछेदवदित्यतो विशेषनिमित्तानि निषेधति॥ नैनमिति॥ वर्तमाननिषेधात्स्या

घु

दुनरत्रेत्यत आह ॥ अछेद्य इति ॥ वर्तमानदर्शनानुक्तमयोग्यत्वमिति सूचयति वर्तमानापदे
र्शन ॥ कुतो योग्यता ॥ नित्यसर्वगतादिविशेषणश्चरसरूपत्वात् ॥ शाश्वत इति एकरूपत्व
मात्रमुक्तं ॥ स्थाणुशब्देन नैमित्तिकमन्यथात्वं निवारयति ॥ नित्यत्वं सर्वगतत्वविशेषणं ॥ अ
न्यथा पुनरुक्तेः ॥ ऐक्यात्कावप्युक्तविशेषणोपादाना नैश्वरे ऽस्य पुनरुक्तिः ॥ मुक्तस्य बिंबधर्माः
प्रतिबिंबे विरोधेन नास्व ॥ रूपं रूपं प्रतिरूपो बभूव ॥ आभास एव चेत्यादिश्रुतिस्मृतिसिद्धा ॥ न
चांशत्वविरोधः ॥ तस्यैवांशत्वात् ॥ न चैकरूपावांशता ॥ प्रमाणं चोभयविधवचनमेव ॥ न चांश
स्य प्रतिबिंबत्वं कल्प्यं ॥ गाध्यादिष्वंशबाहुरूप्याद्दृष्टेरितरत्रादृष्टेः ॥ स्थाणुत्वे ऽपेक्षितत्वाद्य
विरुद्धधर्मीश्वरस्य ॥ उभयविधवाक्यादचिंत्यशक्तेश्च ॥ न च माययैकं ॥ तयीश्वरे ब्रह्मणि नो
विरुध्यते ॥ न योगित्वादीश्वरत्वात् ॥ चित्रं नचैतत्त्वयि कार्यकारणइत्याद्यैश्वर्येणैव विरुद्धध
र्मा विरोधो चेत् ॥ महातात्पर्याच्च ॥ मोक्षो हि महापुरुषार्थः ॥ तत्रापि मोक्ष एवार्थः ॥ अंते पुरेमिरे
धीरा न ते मध्ये पुरेमिरे ॥ अंतः प्राप्तिं सुखं प्राहुर्दुःखमंतरमंतयोः ॥ पुण्यचितो लोकः क्षीयते

इत्यादिश्रुतिस्मृतिभ्यः॥ सर्वविष्णुप्रसादादेवसिध्यति। वासुदेवमनाराध्यकोमोक्षंसमवाप्नुयात्
॥५॥ ॥तुष्टेतुतत्रकिमलभ्यमनंतईशे॥ तत्प्रसादादवाप्नोतिपरांसिद्धिंनसंशयः। एषांसएवभगवान्दययेद
दनंतःसर्वात्मनाश्रितपदोयदिनिर्व्यलीकं॥ तेवैविदंत्यतितरंतिचदेवमायांनैषांममाहमितिधीःश्व
5 सृगालभक्ष्ये॥ तस्मिन्नसन्नेकिमिहास्यलभ्यंधर्मार्थकामैरलमल्पकास्ते॥ ऋतेयदस्मिन्भवई
शधीवास्तापत्रयेणोपहतानशर्म॥ आत्मंल्लभंते॥ ऋतेभवत्प्रसादाद्धिकस्यमोक्षोभवेदिह॥ तमेवं
विद्वानित्यादिश्रुतिस्मृतिभ्यः॥ सर्वोत्कर्षज्ञानादेवभवति॥ लोकप्रसिद्धेः॥ लोकसिद्धमविरुद्धमत्राप्यं
गीकार्यं॥ अहल्याजारत्वाद्यपिदोषस्ततोपितेनबहुतरालेपआसीदित्युत्कर्षमेववक्ति॥ बहुनरकफ
लोह्यसौ॥ तस्यनलोमचहीयतइतिश्रुत्यंनराज्ञे॥ योमामेवमसंमूढोजानातिपुरुषोत्तममितितदु
क्तेश्च॥ सत्यंसत्यंपुनःसत्यंशपथैश्चापिकोटिभिः॥ विष्णुमाहात्म्यलेशस्यविभक्तस्यचकोटिधा॥
पुनश्चानंतधातस्यपुनश्चापिह्यनंतधा॥ नैकांशसममाहात्म्याःश्रीशेषब्रह्मशंकराइतिनारदी ॥५॥
ये॥ अन्योत्कर्षेएकस्यच॥ तथैवसर्वशास्त्रेषुमहाभारतमुत्तमं॥ कोह्यन्यःपुंडरीकाक्षान्महाभारत

रुद्र वेदित्यादिग्रंथांतरसिद्धोत्कर्षं महाभारतविरुद्धं ॥ तत्र हि ॥ नास्ति नारायणसमं न भूतं न भविष्यति
॥ एतेन सत्यवाक्येन सर्वार्थान्साधयाम्यहं ॥ यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसंभवः ॥ न त्वत्समोस्त्या
दिषु साधारणप्रश्नावसर एवमहांतमुत्कर्षं विष्णोर्वक्ति ॥ अन्यत्र यत्किंचिदुक्तं तत्त्वप्यसाधारण्यवा
इंद्रो वसरे ॥ तर्ह्यग्न्यादेरपि वेदादावस्ति ॥ त्वमग्ने र्षभःसतामसि त्वं विष्णुरुरुगायो नमस्यः ॥ विश्वस्मादिं
द्र उत्तर इत्यादिषु ॥ तद्ग्रंथविरोधाच्च ॥ तथा हि स्कांदे शैवे ॥ यदंतरं माघहरीद्रयोर्वने यदंतरं मेरुगिरी
द्रविंध्ययोः ॥ यदंतरं सूर्यसुरेंद्रबिंबयोस्तदंतरं रुद्रमहेंद्रयोरपि ॥ यदंतरं सिंहगजेंद्रयोर्वने
यदंतरं सूर्यशशांकयोर्दिवि ॥ यदंतरं जाह्नविसूर्यकन्ययोस्तदंतरं ब्रह्मगिरीशयोरपि ॥ यदंतरं प्र
ह्लयजवारिविप्रुषोर्यदंतरं स्तंभहिरण्यगर्भयोः ॥ स्फुलिंगसंवर्तकयोर्यदंतरं तदंतरं विष्णुहिर
ण्यगर्भयोः ॥ अनंतत्वान्महाविष्णोस्तदंतरमनंतकं ॥ माहात्म्यसूचनार्थाय ह्युदाहरणमीरितं
॥ न त्वत्समोऽभ्यधिको वापि नास्ति कश्चित्कदाचन ॥ एतेन सत्यवाक्येन तमेव प्रविशाम्यहमित्याद्या
ह ॥ तत्रैव शिवं प्रति मार्कंडेयवचनं ॥ संसारार्णवनिर्मग्न इदानीं मुक्तिमेष्यसीत्यादि पाद्मे ॥ शौ

॥द्वि॥ वेमार्कंडेयकथाप्रबंधे शिवाभिषिध्यविष्णोरेवमुक्तिमाह॥ अहं भोगप्रदो वत्स मोक्षदश्च जनार्दन
इत्याह इति॥ समब्रह्मविरोधाच्च॥ वेदश्चेतिहासाद्यनुरोधेन याज्यः॥ यदि विद्यादिः सादिवचनात्॥ अ
निर्णयाच्चेंद्रादिशंकयान्यथा॥ तत्रापीष्टसिद्धिर्नामवैशेष्यात्॥ अतो भगवदुत्कर्ष एव सर्वागमानां
6 महातात्पर्यं॥ तथापि स्वतःप्रामाण्यासंभवोच्यते॥ अविरोधात्॥ न च प्रमाणसिद्धस्यान्यत्राह
श्रस्यापन्हवो युक्तः॥ धर्मवैचित्र्यादर्थानां॥ स्वतःप्रामाण्यानंगीकारे च मानानां वदोषत्वं साध
यदि यतिप्रसंगः॥ अनन्यापेक्षया वतत्परत्वं सिद्धमागमानां॥ नारायणपरा वेदाः॥ सर्वे वेदा यत्प
दमामनंति॥ वासुदेवपरा वेदा इति॥ न चैतद्विरुद्धं॥ ईश्वरनियमनात्॥ अनादौ वतासिद्धं॥ द्रव्यं
कृ कर्म च कालश्च स्वभावो॥ प्रयोजकत्वं तु पूर्वोक्तन्यायेन॥ अतः सिद्धमेवतत्॥ तज्ज्ञानन्यापेक्षाधियश
क्तित्वएव युक्तं॥ अतो नमायामयमेकं॥ अचलत्वंत प्रहर्षमनानंदमदुःखमसुखं न प्रज्ञं अस
॥द्वि॥ द्वा इत्यादि वक्तृ॥ क्रियादृष्टेः॥ तपो मे हृदयं साक्षात्तनुर्विद्या क्रियाकृतिरित्याद्युक्तेः॥ अतश्च नमाया
दि मयं सर्वं॥ ऐश्वर्यं वापि भगशब्देनैवसंबाधानाच्च॥ तत्वाभगयादौ स्वरूपत्वान्नमायामयत्वं युक्तं

विज्ञानशक्तिरहमास्मनंतशक्तेः ॥ मय्यनंतगुणेऽनंते गुणतोऽनंतविग्रहे ॥ परास्यशक्तिर्विविधैव
दि श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यादिवचनात् ॥ अत एवाव्यक्तस्वरूपः ॥ अस्त्वेवमात्मनो नित्यत्वं
तथापि देहसंयोगवियोगात्मकजन्ममृतीतत्वेत्याह ॥ अथेति ॥ कुतो शोकः ॥ नियतत्वादित्याह ॥ जात
स्येति ॥ तदेव स्पष्टयति ॥ अव्यक्तादीनीति ॥ देहयोगवियोगस्य नियतत्वादात्मनश्चैश्वरस्वरूप
त्वात्सर्वथाऽनाशान्न शोकः कार्य इत्युपसंहर्तु मैश्वरं सामर्थ्यं पुनर्दर्शयति ॥ आश्चर्यवदिति ॥ दुर्लभ
त्वेनेत्यर्थः ॥ तथ्याश्चर्यं लोके ॥ दुर्लभोऽपीश्वरस्वरूपवान्सूक्ष्मत्वाच्चात्मनस्तद्द्रष्टा ॥ सांख्यं ज्ञानं ॥ शुद्धा
त्मतत्वविज्ञानं सांख्यमित्यभिधीयत इति भगवद्वचनाद्व्यासस्मृतौ ॥ योग उपायः ॥ हेष्टा योगाः
प्रयुक्ताश्च पुंसां श्रेयः प्रसिद्धय इति वचनाद्भागवते ॥ न तरां सांख्ययोगौ उपादेयत्वेन विवक्षितौ
कुत्रचित्सामस्त्येन ॥ कर्मयोग इत्यादिप्रयोगाच्च ॥ निंदितत्वाच्चेतरयोर्मोक्षधर्मेषु भिन्नमतत्वमु
क्तापंचरात्रस्तुत्या ॥ वेदानां वेकार्थत्वाविरोधः ॥ पार्थक्यं तु सांख्याद्यपेक्षयायुक्तं ॥ तत्रैव चित्रशि
खंडिशास्त्रे पंचरात्रमूलं वेदैकसाध्यत्वं च ॥ एवमेव सर्वत्र सांख्ययोगशब्द उपादेयपासकैवण
वाचकौ

नीयः॥ युक्तेश्च॥ ज्ञानं हि पूर्वं जैवमुक्तं॥ उपायश्च वक्ष्यते॥ बुध्यते अनयेति बुद्धिः सांख्ययो
॥७॥ गविषयाययावाचा बुध्यते सावाग भिहिते त्यर्थः॥ योगइ मां बुद्धिं श्रृण्विमुक्तं॥ बह्व्यो हि बुद्ध
क यो मतभेदात्तु॥ तत्कथमेत्र निष्टं करोमीत्यतआह॥ व्यवसायात्मिकाबुद्धिरिति॥ सम्यग्युक्ति
निर्मितानां मतानामेकमेवेत्यर्थः॥ स्युरवैदिकानि मतान्यव्यवसायात्मिकानि न तु वैदिकानि
नि॥ तत्रापि हि केचित्तु कर्माणि स्वर्गादिफलान्याहुरित्यतआह॥ यामिमामिति॥ यामाहुस्तयेस्य
न्वयः॥ मोक्षफलमपेक्ष्य स्वर्गादि पुष्पयुक्तां वाचं प्रवदंति॥ वेदवादरताः कर्मादिवाचकवेदवाद
रताः॥ वेदैर्यन्मुखत उच्यते तत्रैव रताः॥ नान्यदस्तीति वादिनः॥ परोक्षविषया वेदाः॥ परोक्ष
प्रियाइव हि देवाः॥ मां विधत्ते भिधत्ते मामित्यादिभिः॥ पारोक्ष्येण प्रायो भगवंतं वदंति॥ भोगै
श्वर्यगतिं प्राप्तिं प्रति॥ तदात्मिफला एव वेदा इति वदंतीत्यर्थः॥ तेषां सम्यग्युक्तिनिर्णयात्मि ॥७॥
धी काबुद्धिः॥ समाधौ समाध्यर्थं न विधीयते॥ सम्यङ्निर्णीतानां हीश्वरमनः समाधानं सम्यग्भ
वति॥ तद्धि मोक्षसाधनं॥ उक्तं चैतदन्यत्र॥ न तस्य तत्वग्रहणाय पुंसो क्षाद्दवीयसीरपिवाचः स

समासनू ॥ स्वप्नेनिरुक्तसागरहमेधिसोख्यं नयस्यहे यानुमितंस्व यंस्यात्तूइति ॥ तांयोगबुद्धि
माह ॥ त्रैगुण्यविषयावेदाइत्यादिना ॥ इतरदपोद्य ॥ वेदानांपरोक्षार्थत्वात्रिगुणसंबंधिस्व
र्गादिप्रतीतार्थइवभाति ॥ परोक्षवादोवेदोयमित्युक्तं ॥ अतःप्रातीतकेऽर्थेभ्रांतिमाकुर्वि
त्यर्थः ॥ वादाविषयकत्वंचमुखतोवचनंस्मृतमित्यभिधानात् ॥ नतुवेदपक्षोनिषिध्यते ॥ वेदे
रामायणेचैवपुराणेभारतेतथा ॥ आदावंतेचमध्येचविष्णुःसर्वत्रगीयते ॥ सर्वेवेदायत्प
दमामनंति ॥ वेदोखिलोधर्ममूलंस्मृतिशीलेचतद्विदां ॥ आचारश्चैवसाधूनामात्मनस्तुष्टि
रेवच ॥ वेदप्रणिहितोधर्मोह्यधर्मस्तद्विपर्ययइति वेदानांसर्वात्मनाविष्णुपरत्वोक्तेः ॥ तद्विहि
तस्यतद्विरुद्धस्यधर्माधर्मत्वोक्तेश्च ॥ तथापिकाम्यकर्मिणांफलंज्ञानिनांनभवतीतिसाम्यमे
प्रयोजन वेत्यतआह ॥ यावानर्थइति ॥ यथायावानर्थउदपानेकूपेभवति तावान्सर्वतःसंप्लुतोदकेंतर्भ
वत्येव ॥ एवंसर्वेषुवेदेषुयत्फलंतद्विजानतोज्ञानिनोब्राह्मणस्यफलेंतर्भवति ॥ ब्रह्माणतीतिब्रा स्य
ह्मणोऽपरोक्षज्ञानी ॥ सहिब्रह्मगच्छति ॥ विजानतइतिज्ञानफलंतस्यदर्शयति ॥ कामात्मनांनिंदा

कृता कथमेषां स्वर्गकामो यजेतेत्यादौ कामस्यापि विहितत्वादित्यत आह ॥ कर्मण्येवेति ॥ तद् इत्युप
लक्षणार्थं ॥ तत्त्वज्ञानिनापि न फलकामकर्तव्यता किमन्वन्येषामिति ॥ न तेस्ति कर्षांचिन्न तेस्तीति ॥
॥५॥ सहि ज्ञानी नरां शइं द्रष्ट्वा ॥ मोहादिस्वाभिभवादेः ॥ यदि तेषां मुहृत्सतानां नस्याज्ञानं काम्येषां ॥ उ
त्या पदेशादश्रयसि सांज्ञानं तेषां ॥ पार्थो पूर्षिषण इति ज्ञानि गणनाञ्च ॥ कामनिषेध एवात्र ॥ फलानि
४ ह्यस्वातंत्र्येण भवंति ॥ न हि कर्मफलानि कर्माभावे यतोऽभवंति ॥ भवंति च काम्यकर्मणो विपर्यय पि
प्रयत्ने ष्यविरोधे ॥ अतः कर्माकरण एव प्रत्यवायः ॥ न तु ज्ञानादिना वा कामनया फलाप्राप्तौ ॥ अ
तः कर्मण्येवाधिकारः ॥ अतस्तदेव कार्यं ॥ न तु कामेन ज्ञानादिनिषेधे न वा फलप्राप्तिः ॥ कामवचना
नां तु तात्पर्यं भगवते वोक्तं ॥ रोचनार्थं फलश्रुतिः ॥ यथा से षड्यरोचनमित्यादि भागवते ॥ अतः
कामी यजेतेत्यर्थः ॥ न तु कामी भूत्वेत्यर्थः ॥ निष्कामं ज्ञानपूर्वं चेतिवचनात् ॥ वक्ष्यमाणत्वाच्च वसंते
वसंते ज्योतिषा यजेतेत्यादिश्रुतिस्वत्वाच्च ॥ अतः मा कर्मफलहेतुर्भूः ॥ कर्मफलं तत्फलं तौ हेतुर्यस्य ॥८॥
स कर्मफलहेतुः स मा भूः ॥ तर्हि न करोमीत्यत आह ॥ मा त इति ॥ कर्माकरणे स्नेहो माभूदित्यर्थः ॥

अन्यफलाभावेपिमत्प्रसादाख्यस्य फलस्याभावात्॥ इच्छावतस्त्वमुक्ता॥ रणीमहते परितोषण येस्या
२त दिमहदाचारात्॥ अनिंदनाद्विशेषतेरनिंदनाञ्च॥ सामान्यंविशेषोबाधत इतिचप्रसिद्धं सर्वानानयेने
कमेत्रमित्यादौ॥ अतोनैकाममतांमेस्पृहयंतिकेचित् भक्तिमन्विच्छंतोब्रह्मजिज्ञासांविज्ञायप्रज्ञांकु
र्व्यादित्यादिवचनेभ्यः॥ स्वाचार्यसेवकंप्रतिनतथास्नेहः॥ किंददामीत्युक्ते सेवादियाचकंप्रतिबहुतर
स्नेहइतिलोकप्रसिद्धत्वात् साक्षाद्भक्तिज्ञानादिप्रार्थनाकार्यतिसिद्धं॥ पूर्वश्लोकोक्तंस्पष्टयति॥ यो
गस्थइति॥ योगस्थः उपायस्थः॥ संगंफलाभिमानं॥ सक्का ततएवसिध्यसिध्योःसमोभूत्वा॥ सएवस
मत्वोक्तोयोगः॥ इतश्चयोगायुयुज्यस्वेत्याह॥ दूरेणेति॥ बुद्धियोगात् ज्ञानलक्षणादुपायात्॥ दूरेणाती
व॥ अतोबुद्धौशरणं ज्ञानसिद्धितिं॥ फलंकर्मरुतोहेतुर्येषांते फलहेतवः॥ ज्ञानफलमाह॥ बु
द्धियुक्तइति॥ सुकृतमप्यप्रियंमानुष्यादिफलंजहाति॥ नब्रह्मफलमुपासनादि॥ नह्यस्यकर्मक्षी निमित्तं
यते॥ अविदित्वास्मिंल्लोके जुहोतियजतेतपस्तप्यतेबहूनिवर्षसहस्राण्यंतवदेवास्यतद्भवती
त्यादिश्रुतिभ्यः॥ अतः कर्मक्षयश्रुतिरसात्त्विकविषया सर्वत्र॥ उपायक्षयश्रुतिरनिष्टविषया॥ नही

ऽपुण्यक्षये किं तेन प्रयोजनं॥ न चेष्टनाशो ज्ञानिनो युक्तः॥ इष्टाश्च केचिद्विषयाः॥ स यदि पितृलो
॥१९॥ ककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठंति॥ प्रजापतेः सभां वेश्म प्रपद्ये॥ यशोऽहं भवामि हं
ब्राह्मणानां॥ स्त्रीभिर्वा यानैर्वा॥ अस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते॥ कामान्नी कामरूप्य
१ नुसंचरन्॥ स एकधा भवतीत्यादिश्रुतिभ्यः॥ बहुलेप्यात्मसुखस्य पुनरिष्टलोकमसुखेन विरो
धः॥ अनुभवशक्तिश्चेश्वरप्रसादात्कुतोऽस्य॥ न च शरीरपातात्पूर्वमेवैतत्॥ स तत्र पर्येति॥ एतमानं
दमयमात्मानमुपसंक्रम्य॥ याचुतरत्वश्रवणात्॥ न चैकीभूत एव ब्रह्मणा सह॥ मम तस्य हि परे ज्ञाने कि
मु दुःखतरं स्वर्गादित्यादिनिंदनान्मोक्षधर्मे॥ परिहारे पृथग्भोगाभिधानाच्च॥ शुक्रादीनां पृथग्दृष्टे
श्च॥ जगद्व्यापारवर्ज्यमित्यादैश्वर्यमर्यादोक्तेश्च॥ इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागता इति च॥ उपा
धिनाशेन नाशाच्च प्रतिबिंबस्य॥ न चैकीभूतस्य पृथग्ज्ञाने मानं पश्यामः॥ आसं दुःखी नासमिति ज्ञान
विरोधाच्चेश्वरस्य॥ अनेन रूपेणेति च भेदाभावात्॥ न च प्रतिबिंबस्य बिंबे मूसं लोके पश्यामः॥ उपा
धिनाशे मानं वा॥ मम तस्य हि परे ज्ञान इति दुःखात्मकत्वोक्तेः॥ यावदात्मभावित्वादिषुपाधिना ॥१९॥
प्रतीयमान स्य ताभिधानाच्च॥ अतोऽन्यवचनमप्योपचारिकं॥ ह शाश्च्यते भगवतोभिप्रायानादरेण॥ प्रतिज्ञासंवा

स्यैस एकधेत्यादिषु भेदेन प्रतीयते ॥ विरोधे तु युक्तिमतामेव बलवत्त्वं ॥ युक्तयश्चात्रोक्ता आमसस्य
हीत्यादयः ॥ अतो जले जलैकीभाववदेकीभावः ॥ उक्तं च ॥ यथोदकं शुद्धे शुद्धं ॥ यथा नद्य इत्यादौ ॥ तत्रा
प्यन्योन्यात्मकत्वध्यसंभवः ॥ अस्ति चैष समुद्रे पि वारि महत्वादन्यत्राहष्टिः ॥ तत एवापादितो तस्यस
ऋषिः शंसितव्रत इति महाकोऽपि समर्थानां भेदशानाञ्च ॥ नैवत आपुर्वं ते ब्रह्मेशानादयः सुराः ॥
यत्ते पदं हि कैवल्यमिति निषेधाच्च नारदीये ॥ सविचारश्च निर्णयः कृतो मोक्षधर्मेषु बलवांश्च
स विचारो निर्णयो वाक्यमात्रात् ॥ अतो यत्र नान्यलक्ष्यतीत्याद्यपि तदधीनसत्त्वादिवाचि ॥ अ
न्यथा कथमेश्वयोदिः स्यात् ॥ न च तन्मायामायमित्युक्तं ॥ अन्यथा कथं तत्रैव स एकधेत्यादि ब्रूयात् ॥
न च न हवै सशरीरस्येत्यादि विरोधः ॥ वैलक्षण्यात्तच्छरीराणां ॥ अप्राकृतानि हि तानि नित्योपाधिवि
निर्मितानीश्वरशक्त्या ॥ तथा चोक्तं ॥ शरीरं जायते तेषां षोडश्या कलया वतु इति नारायणरामक
ल्पे ॥ वदंति च लौकिकं वैलक्षण्येऽभावशब्दं ॥ अप्रहर्षमनानंदं सुखदुःखबाह्य इत्यादिषु ॥ नि
रुक्तसभावाच्चनतानि शरीराणि ॥ तथा हि श्रुतिः ॥ अशरीरी तच्छरीरमभवदिति ॥ न हि तानि शीर्णा
नि भवंति ॥ सर्गेऽपि नोपजायंते प्रलये न व्यथंति चेति वचनात् ॥ साम्यात्संयोगः ॥ प्रयोगाच्च ॥ अनिंद्रिया अ

॥१०॥ नाहारा अनिष्पंदाः सुगंधिनः॥ देहेंद्रियासुहीनानां वैकुंठपुरवासिनामित्यादिहष्टदेहेष्वेव॥ नचैषा
न्या गौणी मुक्तिः॥ बहुनात्र किमुक्तेन यावद्धृतं न गच्छति॥ योगी तावन्न मुक्तः स्यादेष शास्त्रस्य निर्ण
10 य इत्यादित्यपुराणे तदन्यमुक्तिनिषेधात्॥ यत्तत्रैव भगवंतं प्रविशंति तेपि पश्चात्तत्रैव यांति॥ योग्यत्वं चा
त्र विवक्षितं॥ युधिष्ठिरप्रश्न इतरनिंदनाच्च॥ सायुज्यं च ग्रहवत्॥ तदुक्तं च॥ भुंजते पुरुषं प्राप्य यथा
देवग्रहादयः॥ तथा मुक्ता भुंजते मायां बाह्यान्भोगांस्तु भुंजत इति नारायणषडक्षरकल्पे॥ अतो निष्टस्यै
व वियोगः॥ सोस्य वसवीत्मना॥ अदुःखं॥ सर्वदुःखविवर्जिताः॥ अशोकमहिमां तत्र यत्र गत्वा न शोच
तीत्यादिश्रुतिभ्यः॥ विशेषवचनाभावाच्च॥ येषां लिंगं विदृश्यते ते न सायुज्यं प्राप्ताः॥ सामीप्याद्येव तेषां॥
अतः प्रारब्धकर्मशेषभावात् तद्भुक्त्वा सायुज्यं गच्छति॥ तच्चोक्तं॥ संकर्षणादयः सर्वे स्वाधिकारादनं
तरं॥ प्रविशंति परं देवं विष्णुं नास्त्यत्र संशय इति व्यासयोगे॥ अतो निष्टस्य सर्वात्मना वियोगः॥ प ॥१०॥
रब्रह्म त्वमिच्छामि परब्रह्म जनार्दनेत्यादिना ब्रह्मादिभिरपि प्रार्थितत्वात्॥ न मोक्षसदृशं किंचिद
धिकं वा सुखं क्वचित्॥ ऋते वैष्णवमानंदं वाङ्मनोगोचरं महदित्यादेश्च॥ ब्रह्मादिपदादाधिपधि

कृतमं सुखं च मोक्ष इति सिद्धं ॥ अतो योगाय युज्यस्व ज्ञानोपायाय कर्म कौशलं ॥ तदुपायमाह ॥ क तद्धि
र्मजमिति ॥ कर्मजं फलं त्यक्त्वा कामनया ईश्वराय समर्प्य बुद्धियुक्ताः सम्यग्ज्ञानिनोऽम्हूलो पदं गच्छंति ।
स योग कर्मज्ञानसाधनं तन्मोक्षसाधनमिति भावः ॥ कियत्पर्यंतमवश्यं कर्तव्यानि मुमुक्षुणैवं कर्मा
णीत्यत आह ॥ यदेति ॥ निर्वेदं नितरां लाभं ॥ प्रयोगात्तस्मात् ब्राह्मणः पांडित्यं निर्विद्येत्यादि ॥ न
हि तत्र वैराग्यमुपपद्यते ॥ तथा सति पांडित्यादि तिस्यात् ॥ न च ज्ञानिनां भगवन्महिमादिश्रवणे वि
रक्तिः संभवति ॥ आत्मारामा हि मुनयो निर्ग्रंथा अप्युरुक्रमे ॥ कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो
हरिरिति वचनात् ॥ अनुष्ठानाच्च शुकादीनां ॥ न च तेषां फलं नास्ति ॥ तस्यैव महत्सुखत्वात्तेषां ॥
या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ॥ सा ब्रह्मणि स्वमहिम
न्यपि नाथ मा भूत् किं त्वंतकासिलुलितात्पततां विमानादित्यादिवचनात् ॥ तेषामभ्युपासना
दिफलस्य साधितत्वात् ॥ तारतम्याधिगतेश्च ॥ तथा हि ॥ यदि तारतम्यं न स्यात् ॥ नात्यंतिकं वि
गणयंत्यपि ते प्रसादं नैकात्म्यतां मे स्पृहयंति केचित् ॥ एकत्वमप्युत दीयमानं न गृह्णंतीति मु

क्तिमप्यनिच्छतामपिमोक्षएवफलं॥ तमिच्छतामपिसम्भवतिसुप्रतीकादीनामिति कथमनिच्छ
॥११॥ तांस्तुतिरूपपन्नास्यात्॥वचनाच्च॥यथाभक्तिविशेषोत्र दृश्यते पुरुषोत्तमे॥तथामुक्तिविशेषो
पिज्ञानिनांलिंगभेदने॥योगिनांभिन्नलिंगानामाविर्भूतस्वरूपिणां॥प्राप्तानांपरमानंदंतारत
वि ॥ म्यंसदैवहीति॥ नतामतिशेष्यंतिमुक्तावपिकथंचन॥मद्भक्तियोगाद्ज्ञानाच्च सर्वानतिशयिष्यसी
तिच॥साम्यवचनंतुप्राचुर्यविषये॥दुःखाभावविषयंच॥ तथाप्रोक्तं॥दुःखाभावःपरानंदोलिंगभे
दःसमामताः॥ तथापिपरमानंदोज्ञानभेदात्तुभिद्यत इतिनारायणाष्टाक्षरकल्पे॥अतोनवैराग्य
मुख्यादावत्रविवक्षितं॥नचसंकोचमानंकिंचिद्विद्यमान इतरत्रप्रयोगे॥महद्भिःश्रवणीयस्यश्रु
च तस्यवेदादेःफलंप्राप्स्यसीत्यर्थः॥तदेवस्पष्टयति॥ श्रुतिविप्रतिपन्नेति॥पूर्वंश्रुतिभिर्वेदैर्विप्र
तिपन्नाविरुद्धाभासातीयदावेदार्थानुकूलेनतत्वनिश्चयेनविपरीतवाग्भिरपिनिश्चलाभवति॥त ॥११॥
त्त्वसमाधावचला॥ब्रह्मप्रत्यक्षदर्शनेनभेरीताडनादावपिपरमानंदमगत्वा तदायोगमवाप्स्य
सि॥उपायसिद्धोभवसीत्यर्थः॥स्थितप्रज्ञाज्ञानंयस्यसःस्थितप्रज्ञः॥भाष्यतेऽनयेतिभाषालक्ष

णमित्यर्थः॥ उक्तं लक्षणमनुवदति॥ लक्षणांतरं पृच्छामीति ज्ञापयितुं समाधिस्थस्येति॥ कं ब्रह्माणं
मीशं रुद्रं वर्तयतीति केशवः॥ तथाहि निरुक्तिः कृता हरिवंशेषु रुद्रेण कैलासयात्रायां॥ हिरण्यगर्भः
कः प्रोक्त ईशः शंकर एव च स्तथ्यादिना वर्तयतीति यतः केशवो भवानिति वचनांतराच्च॥ किमासीतकिं
प्रयासीत॥ न चार्जुनो जानाति तल्लक्षणादिकं॥ जानंति पूर्वराजानो देवर्षयस्तथैव च॥ तथापि धर्मा
न्पृच्छंति वार्त्तायै गुह्यवित्तये॥ न ते गुह्याः प्रतीयते पुराणेष्वल्पबुद्धिनामिति वचनात्॥ गमनादिप्र
वृत्तिर्नीत्यभिसंधिपूर्विका मत्तादिप्रवृत्तिवदिति यानि शेत्यादिना दर्शयिष्यन्नु लक्षणं प्रथमत आह
॥ एवं परमानंदतृप्तः किमर्थं प्रवृत्तिं करोतीति प्रश्नाशयः॥ प्रारब्धकर्मणेषत्तिरोहित ब्रह्मणा वास
नया प्रायोल्याभिसंधिपूर्विका गमनादिप्रवृत्तिः संभवतीत्याशयवान्परिहरति॥ प्रायः सर्वान्प्रजाह
म ति॥ सूकादीनां मीषद्दर्शनात्॥ तत्प्रसादसक्तिमिच्छंति ज्ञानिनस्तत्वदर्शिन इत्युक्तेस्तामिच्छंति॥ यदा
लिंगादीनामाग्रहो दृश्यते तदाभिप्रेतं तेषां ज्ञानं॥ तत्रोक्तं॥ आधिकारिकपुंसां तु बहुकर्मैव का
रणात्॥ उद्भवाभिभवौ ज्ञाने तत्तात्यभ्यो विलक्षणा इति॥ अत एव वैलक्षिण्याद नधिकारिणामाग्र

॥१२॥ हार्दिने दस्ति न ते ज्ञानिन इत्यवगंतव्यं ॥ न चात्र समाधिं कुर्वतो लक्षणमुच्यते ॥ यः सर्वत्रानभि

स्नेह इति स्नेहनिषेधात् ॥ नहि समाधिं कुर्वतस्तस्य शुभाशुभप्राप्तिरस्ति ॥ असंप्रज्ञातसमाधेः ॥

12

संप्रज्ञातत्वविरोधः ॥ तथापि न तत्रैवेति नियमः ॥ कामादयो न जायंते ह्यपि विक्षिप्तचेतसां ॥ ज्ञा

निनां ज्ञाननिर्धूतमलानां देवसंश्रयादिति स्मृतेः ॥ मनोगता हि कामाः ॥ अतस्तत्रैव तद्विरुद्धज्ञानोत्प

रसोऽप्यस्य

त्त्यो युक्तं हानं तेषामिति दर्शयति ॥ मनोगतानिति ॥ विरोधश्चोच्यते परं दृष्ट्वा निवर्तत इति ॥ नचै

तद्दृष्ट्याऽपलपनीयं ॥ पुरुषवैशेष्यात् ॥ आत्मना परमात्मना ॥ परमात्मन्येव स्थितः सन्नात्मा

त्वेतस्मिं स्थितस्य तत्प्रसादादेव तुष्टिर्भवति ॥ विषयांस्तु परित्यज्य रामे स्थितिमतस्ततः ॥ देवाद्

वति वै तुष्टिर्नान्यथा तु कथंचनेत्युक्तं नारायणरामकल्पे ॥ आत्मनाऽनात्माजीवः ॥ तदेवस्पष्टयत्यु

त्तरैस्त्रिभिः श्लोकैः ॥ एतान्येव ज्ञानोपायानि ॥ तद्योक्तं ॥ तद्वैजिज्ञासुभिः साध्यं ज्ञानिनां यत्तु लक्षणमि

ति ॥ शोकसनाध्यासो रागः ॥ रसो रागस्तथा रक्तिः शोकसनाध्यासउच्यत इत्यभिधानात् ॥ सर्वत्रानभि ॥१२॥

स्नेह तत्तच्छुभाशुभं प्राप्य नाभिनंदति न द्वेष्टि ॥ नचैतल्लक्षणं ज्ञानमयत्नतोऽपि भवतीत्याहोत्तर

श्लोकैः ॥ निराहारत्वेन विषयभोगसामर्थ्याभाव एव भवति ॥ इतरविषयकांक्षाभावो वा ॥ रसा

कांक्षादिर्न निवर्तते ॥ सत्वपरोक्षज्ञानादेव निवर्तत इत्याह ॥ विषया इति ॥ इंद्रियाणि जयंत्यात्मनु निराहा
रा मनीषिणः ॥ वर्जयित्वा तु रसं नाम सोऽरस्य तु वर्धत इति वचनाद्भागवते ॥ रसशब्दस्य रागवाचित्वा
च्च ॥ अपरोक्षज्ञानरहितं ज्ञानिनोऽपि साधारणे यत्नवतोऽपि मनो हरंती इंद्रियाणि ॥ पुरुषस्य शरीराभि
मानिनः ॥ को दोषस्ततः ॥ प्रमाथीनि प्रमथनशीलानि पुरुषस्य ॥ तर्हि शक्यान्यवत्यत आह ॥ तानीति ॥ बहुय
त्नवतः शक्यान्यतो यत्नं कुर्यादित्याशयः ॥ युक्तः मयि मनो युक्तः ॥ अहमेव परस्तु ईशो यस्य समत्परः ॥ फ
लमाह ॥ वशे हीति ॥ रागादि दोषकारणमाह परिहाराय श्लोकद्वयेन ॥ संमोहोऽकार्येच्छा ॥ तथा हि ॥ मोह श
ब्दार्थ उक्त उपगीतासु ॥ मोहसंज्ञितं ॥ अधर्मलक्षणं चैव नियतं पापकर्मसु इति ॥ तथा चान्यत्र ॥ संमोहोऽध
र्मकामितेति ॥ स्मृतिविभ्रमः प्रतिषेधादिस्मृतिविनाशः ॥ बुद्धिनाशः सर्वात्मना दोषबुद्धिनाशः ॥ वि
नश्यति नरकाद्यनर्थं प्राप्नोति ॥ तथाहु कैः ॥ अधर्मकामिनः शास्त्रविस्मृतिर्जायते यदा ॥ दोषादृष्टेस्त
तस्तेश्च नरकं प्रतिपद्यत इति ॥ इंद्रियजयफलमाहोत्तराभ्यां श्लोकाभ्यां ॥ विषयाननुभवन्नपि ॥ वि
धेय आत्मा मनो यस्य सः ॥ जितात्मेत्यर्थः ॥ प्रसादं मनःप्रसादं ॥ कथं प्रसादमात्रेण सर्वदुःखहानिः ॥ प्र
सन्नचेतसो हि बुद्धिः पर्यवतिष्ठति ॥ ब्रह्मापरोक्षेण बुद्धिः सम्यक् स्थितिं करोति ॥ प्रसादो नाम प्र

बस्मादु

यो विषयागतिः ॥ प्रसादाभावे दोषमाहोत्तराभ्यां श्लोकाभ्यां ॥ न हि प्रसादाभावे युक्तश्चित्तनिरो
धः ॥ अयुक्तस्य न बुद्धिः सम्यक्ज्ञानं नास्ति ॥ तदेवोपपादयति ॥ न चायुक्तस्य भावनेति ॥ शांतिर्मु
क्तिः ॥ शांतिर्मोक्षोथ निर्वाणमित्यभिधानात् ॥ कुथमयुक्तस्य भावना न भवतीत्यत आह ॥ इंद्रिया
णामिति ॥ अनुविधीयते क्रियते ॥ नन्वीश्वरणेंद्रियाणामनु ॥ बुद्धिर्ज्ञानमिति वक्ष्यमाणत्वात् ॥ प्रज्ञा
प्रज्ञानं ॥ उत्पन्नमप्यदपि निवारयतीर्थः ॥ उत्पन्नस्याप्यभिभवो भवतीत्यर्थः ॥ तस्मात्सर्वात्मना नि
गृहीतेंद्रिय एव ज्ञानीति निगमयति ॥ तस्मादिति ॥ उक्तं लक्षणं पिंडीकृत्याह ॥ या निशेति ॥
या सर्वभूतानां निशा परमेश्वरस्वरूपलक्षणा ॥ यस्यां तु सुप्ता नीव न किंचिज्जानंति ॥ तस्यामिं
द्रियसंयमयुक्तो ज्ञानी जागर्ति सम्यगपरोक्षेण पश्यति परमात्मानमित्यर्थः ॥ यस्यां विषय
लक्षणायां भूतानि जाग्रति तस्यां निशा यामिव सुप्तः प्रायो न जानाति ॥ मत्तादिवत् ॥ गमनादि
वृत्तिः ॥ तदुक्तं ॥ देहं तु तन्नस्वरमं ॥ देहोपि दैववशग इति श्लोकाभ्यां ॥ मननयुक्तो मुनिः ॥ पश्य
त इत्यस्य साधनमाह ॥ तेन विषयानुभवप्रकारमाह ॥ आपूर्यमाणमिति ॥ यो विषयैरापूर्यमा

॥१३॥

णोप्यचलप्रतिष्ठोभवति ॥ नातंकंप्राप्नोति ॥ नचप्रयत्नंकरोति ॥ नचाभावेशुष्यति ॥ नहिस
मुद्रः सरित्प्रविशाप्रवेशानिमित्तौ रद्धिशोषौबहुतरंप्राप्नोति ॥ प्रयत्नंचकरोति ॥ समुक्तिंप्र
प्नोतीत्यर्थः ॥ एतदेवप्रपंचयति ॥ विहायेति ॥ कामान्विषयानभिस्पृहतया विहाय यश्चरतिभ
क्षयति ॥ भक्षयामीत्यहंकारममकारवर्जितश्च ॥ सहिपुमान्सएवमुक्तिमधिगच्छतीत्यर्थः ॥
उपसंहरति ॥ एषेति ॥ ब्राह्मीस्थितिः ब्रह्मविषयास्थितिर्लक्षणं ॥ अंतकालेप्यस्यांस्थि
व तौस्थितौब्रह्मगच्छति ॥ अन्यथाजन्मांतरंप्राप्नोति ॥ यंयंवापीतिवक्ष्यमाणत्वात् ॥ ज्ञानि
नामपिसतिप्रारब्धकर्मणिशरीरांतरंयुक्तं ॥ भोगेनत्वितरे इत्युक्तं ॥ संतिहि बहुशरीरफला
निकर्माणिकानिचित् ॥ सप्तजन्मनिविप्रः स्यादित्यादेः ॥ हरेश्च ज्ञानिनामपिबहुशरीरप्राप्तेः ॥
तथाह्युक्तं ॥ स्थितप्रज्ञोपि यस्तूर्ध्वं प्राप्यरौद्रपदंततः ॥ सांकर्षणंततोमुक्तिमगाद्धि प्रभुप्र
सादतइति गारुडे ॥ महादेवपरेजन्मन्स्तव मुक्तिर्निरूप्यत इतिनारदीये ॥ निश्चितफलत्वंचज्ञा च
नंतस्यतावदेवचिरं ॥ यदुपनार्चिषमेवाभिसंभवंतीत्यादिश्रुतिभ्यः ॥ ननुकायव्यूहापेक्षा

का ॥तद्यथैषीकतूलं॥ तद्यथा पुष्करपलाशे॥ ज्ञानाग्निः सर्वकर्माणीत्यादिवचनेभ्यः॥ प्रारब्धे तु
विरोधः॥ प्रमाणाभावाच्च॥ न च तच्छास्त्रं प्रमाणं॥ अक्षपादकणादानां सांख्ययोगजटाश्रितां
॥१४॥ ॥मतमालंब्य ये वेदं दूषयंत्यल्पचेतसः श्रुतिनिंदनात्॥ यत्र तु स्तुतिस्तत्र शिवपरत्वानां स्तुति
परत्वमेव न सत्यत्वं॥ नहि तेषामपीतरग्रंथविरुद्धार्थे प्रामाण्यं॥ तथा ह्युक्तं॥ त्वं च रुद्र महा
बाहो मोहशास्त्राणि कारय॥ अतथ्यानि वितथ्यानि दर्शयस्व महाभुज॥ प्रकाशं कुरु चात्मा
नमप्रकाशं च मां कुर्विति वराहे॥ कुत्सितानि च मिश्राणि रुद्रो विष्णुप्रचोदितः॥ चकार शा
स्त्राणि विप्र ऋषयस्तत्र चोदिताः॥ दधीच्याद्याः पुराणानि तच्छास्त्रसमयेन तु॥ चक्रुर्वै दैत्य
ब्राह्माणि वैष्णवान्विष्णुर्बोदितः॥ पंचरात्रं भारतं च मूलरामायणं तथा॥ तथा पुराणं भा
गवतं विष्णुवेद इतीरिताः॥ अतः शैवपुराणानि योज्यान्यन्याविरोधतः इति नारदीये॥
अतो ज्ञानिनां सर्वत्यैव मुक्तिः॥ भीष्मादीनां तु तस्मिन्क्षणे मुक्त्यभावः॥ स्मरंस्त्यजतीति ॥१४॥
वर्तमानापदेशो हि कृतः॥ तच्चोक्तं॥ ज्ञानिनां कर्मधुरकानां कायत्यागक्षणो यदा॥ विष्णु

ष्णुमाया तदा तेषां मनोबाह्यं करोतिह्रीतिगारुडे ॥ न चान्येषां तत्संस्मृतिर्भवति ॥ बहुजन्मवि तद्रा
पाकेन भक्तिज्ञानेन न येहरिं ॥ भजंति तत्स्मृतिस्तं तेदेवो याति न चान्यथेत्युक्तेर्ब्रह्मैवैव तैः ॥ नि
र्वाणमशरीरं ॥ कायो बाणं शारीरं चेत्यभिधानात् ॥ तद्बाणमेव ह्यस्यति प्रयोगाच्च ॥ निर्वाणश
ब्दप्रतिपादनमनिंद्रियाद्इत्यादिवत् ॥ कथमन्यथा सर्वपुराणादिप्रसिद्धा स्तुतिर्भगवत उपपद्य
ते ॥ न चान्यद्भगवत उत्तमं ब्रह्म ॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यत इति भागवते ॥ भगवं
तं परं ब्रह्म परं ब्रह्म जनार्दनः ॥ परमं यो महद्ब्रह्म ॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ॥ यो सा
वतींद्रियग्राह्यः ॥ नास्ति नारायणसमं न भूतं न भविष्यति ॥ न तत्समोऽस्त्यभ्यधिकः कुतोऽन्य इत्या
दिभ्यः ॥ न च तद्ब्रह्मणोऽशरीरत्वादेतत्कल्प्यं ॥ तस्यापि शरीरश्रवणात् ॥ आनंदरूपममृतं सुवर्ण
ज्योतिः ॥ दहरोऽस्मिन्नंतर आकाश इत्यादिषु ॥ यदि रूपं न स्यात् आनंदमित्येव स्यात् ॥ न त्वानंदरूप
मिति ॥ कथं सुवर्णरूपत्वं स्यादरूपस्य ॥ कथं च दहरत्वं दहरस्थत्वस्य के चित्स्वदेहे योदो रूपवानु
च्यते ॥ सहस्रशीर्षा पुरुषः ॥ रुक्मवर्णं कर्तारं ॥ आदित्यवर्णं तमसः पुरस्तात् ॥ सर्वतः पाणिपादं त

तू ॥ विश्वतश्चक्षुरित्यादिवचनात् ॥ किंचरूपाध्यायादैश्वर्यरूपवानवसीयते ॥ अतिपूर्णतमज्ञानै परि
॥१५॥ श्वर्यवीर्यानंदश्रीशक्तिमांश्च भगवान् ॥ परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबल
नंदस्या क्रियाच ॥ यः सर्वज्ञः ॥ आनंदं ब्रह्मणः ॥ एतस्यैवान्यानि भूतानि मात्रामुपजीवंति ॥ अनादिमध्यां
तमनंतवीर्यं सहस्रलक्षामितकांतिकांतं ॥ मय्यनंतगुणेऽनंते गुणतानंतविग्रहे ॥ विज्ञान
15 शक्तिरहमास मनंतशक्तेः ॥ तुर्यं तत्सर्वदृक्सदा ॥ आत्मानमन्यं च सर्वं दविद्वान् ॥ अन्यतमा
मुकुंदात्को नाम लोके भगवत्पदार्थः ॥ ऐश्वर्यस्य समग्रस्य ॥ अतीव परिपूर्णते सुखं ज्ञानं च सो
त्य भगं ॥ यच्चाणु तं स्मर्तुं वा शक्तः कर्तुमतः परं इत्यादिभ्यः ॥ तानि सर्वाण्यन्यान्यस्वरूपाणि ॥ वि
ज्ञानमानंदं ब्रह्म ॥ आनंदो ब्रह्मेति व्यजानात् ॥ सत्यं ज्ञानमनंतं ब्रह्म ॥ यस्य ज्ञानमयं तपः ॥ समा
भगप्रविशास्वाहा ॥ न तस्य प्राकृता मूर्तिर्मांसमेदोऽस्थिसंभवा ॥ न योगित्वादीश्वरत्वात्सत्य ॥१५॥
रूपाच्युतो विभुः ॥ सद्देहः सुखगंधश्च ज्ञानभाः सत्पराक्रमः ॥ ज्ञानज्ञानः सुखसुखः विष्णुः प स
रमोक्षर इति पैंगिश्रुतिः ॥ देहोऽयं मे सदानंदो नायं प्रकृतिनिर्मितः ॥ परिपूर्णश्च सर्वत्र तेन

नारायणोस्म्यहमित्यादि ब्रह्मवैवर्ते ॥ तदेवलीलया वासौ परिच्छिन्नादिरूपेण दर्शयति मायया
॥ न च गर्भेवसद्देव्याः न चापि वसुदेवतः ॥ न चापि राघवाज्जातो न चापि जमदग्नितः ॥ नित्यानंदो ह
योप्येवं क्रीडते मोघदर्शनइति पाद्मे ॥ न वै स आत्मात्मवतामधीश्वरो भुंक्ते हि दुःखं भगवान्वासुदेवः
॥ स्वर्गादेरीशिताजः परमसुखनिधिर्बोधरूपोप्यबोधं लोकानां दर्शयंन्या मुनिसुतहतात्म प्रिया
र्थेजगाम ॥ स ब्रह्मबंध च रणोज्झनमोहनाय स्त्रीसंगिनामिति रतिं प्रथयंश्चचार ॥ पूर्तेरचिंत्य वी
र्यो यश्च दाशरथिः स्वयं ॥ रुद्रवाक्यमृतं कर्तुमजितो जितवत्स्थितः ॥ योजितो विजितोश्च तस्मा
गांगेयं न जघान ह ॥ न त्वां बाणं ग्राहयामास करुणः कपरंतप इत्यादि स्यश्च स्कांदे ॥ न तत्र संसा
रनिरूप्यधर्माः यत्र स्वपरावरभेदो वगम्यते ॥ तत्राज्ञबुद्धिमपेक्ष्यावरत्वं विश्वरूपमपेक्ष्यान्यत्र ॥
॥ तथोक्तं ॥ परिपूर्णानि रूपाणि समान्यखिलरूपतः ॥ तथाप्यपेक्ष्य मंदानां दृष्टिं स्वाम्यपथ्या
पि हि ॥ परावरत्वं वदंत्येव ह्यसक्तानां विमोहनमिति गारुडे ॥ न चात्र किंचिदुपचरितादिवा
च्यं ॥ अचिंत्यशक्तेः ॥ पदार्थवैचित्र्याच्चोक्तं ॥ कृष्णरामादिरूपाणि परिपूर्णानि सर्वदा ॥
न चाणुमात्रं भिन्नानि तथाप्यस्मान्विमोहसी याद्रश्च नारदीये ॥ तस्मात्सर्वरूपेष्वनंतगु

भगव० भाष्यं २

॥१६॥ 16

णं नित्यनिरस्तदोषं तं नारायणाख्यं परं ब्रह्मापरोक्षज्ञान्पूर्द्दं छतीति सिद्धं ॥ ॥ इतिश्रीम
दानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीताभाष्ये द्वितीयोध्यायः ॥ ॥ श्रीकृष्णार्प
णमस्तु ॥ ॥ ॐ ॥ आत्मस्वरूपं ज्ञानसाधनं चोक्तं पूर्वत्र ॥ ज्ञानसाधनत्वेनाकर्म विनिंद्य कर्मविधी
यत उत्तराध्याये ॥ कर्मणो ज्ञानमस्युत्तममिति अभिहितं भगवता दूरेण ह्यवरं कर्म इत्यादौ ॥ एवं
मितिक चेत्किं मां घोरे युद्धाख्ये नियोजयसि निरत्तं च मान्विनेत्याह ॥ ज्यायसीति ॥ कर्मणः सकाशाद्बुद्धि
र्ज्यायसी चेत्ते मता ॥ तत्तर्हि ॥ ज्यायस्त्वेपि बुद्धेराधिकारिकत्वात्त्वं कर्मण्येधिकृत इति तत्र नियोक्ष्या प्य
मीत्याशयवान्भगवानाह ॥ लोक इति ॥ द्विविधा अपि जनाः संति ॥ गृहस्थादिकर्मत्यागेन ज्ञाननि
श्च ष्ठाः सनकादिवत् ॥ तत्स्था एव ज्ञाननिष्ठा जनकादिवत् ॥ मद्धर्मस्था एवेत्यर्थः ॥ सांख्यानां ज्ञानि
नां सनकादीनां ॥ योगिनामुपायिनां जनकादीनां ॥ ज्ञाने निष्ठा अप्याधिकारिकत्वादीश्वरेच्छया
र्थे लोकसंग्रहार्थत्वाच्च कर्मयोग्यत्वेपि योगिनः ॥ निष्ठा स्थितिः ॥ त्वं तु जनकादिवत्सकर्मैव ज्ञान्या
ग्यः न तु सनकादिवत्त्यागेनेत्यर्थः ॥ संति हीश्वरेच्छयैव कर्मरताः प्रियव्रतादयोपि ज्ञानिनः एवं तत

भवंति

॥१६॥

याप्युक्तं ॥ ईश्वरेच्छाविनिवेशितः कर्माधिकार इति ॥ इतश्च नियोक्ष्यामीत्याह ॥ न कर्मणामिति ॥
कर्मणां युद्धादीनामनारंभेण नैष्कर्म्यं निष्कर्मता काम्यकर्मपरित्यागेन प्राप्यत इति मोक्षं ना-
श्नुते ॥ ज्ञानमेव तत्साधनं न तु कर्माकरणमित्यर्थः ॥ कुतः ॥ पुरुषत्वात् ॥ सर्वदा स्थूलेन सूक्ष्मेण
वापुरेण युक्तो न नु जीवः ॥ यदि कर्माकरणेन मुक्तिः स्यात्तर्हि वराणां नचाकरणे कर्माभावान्मुक्तिर्भ- व
वति ॥ प्रतिजन्मसृतानामनंतानां कर्मणामभावात् ॥ न च सर्वाणि भुक्तानि ॥ एकस्मिंछरीरे बहूनि
हि कर्माणि करोति ॥ तानि चैकैकानि बहुजन्मफलानि कानिचित् ॥ तत्र चैकैकानि कर्माणि
भुंजन्प्राप्नोत्यवशेषेण मानुष्यं ॥ ततश्च बहुशरीरफलानि कर्माणीत्यसमाप्तिः ॥ तथोक्तं ॥
जीवंश्चतुर्दशादूर्ध्वं पुरुषो नियमेन तु ॥ स्त्री वाप्यनूनमदशकं देहं मानुषमार्जति ॥ स चतु-
तुर्दशार्ध्वजीवीनि संसारस्यादिवर्जितः ॥ अविदित्वा परं दैवं मोक्षाशा का महामुने इति ब्रह्मांतो
चसादि डे ॥ यदि स्यात् संसारः पूर्वकर्माभावात्तदसमाप्तिः ॥ अबंधकत्वम् कामनैव भवति ॥ तच्च वक्ष्यते ॥

॥१७॥ अनिष्टं मिश्रमिति ॥ ननु निष्कामकर्मणः फलाभावान्मोक्षः स्यात् ॥ निष्कामं त्वान एवं तु निवृत्त
मिह चोच्यते ॥ निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनमिति वामने ॥ अतस्तत्साम्याद करणे
17 प्रिभवतीत्यत आह ॥ नवेति ॥ संन्यासः काम्यकर्मपरित्यागः ॥ काम्यानां कर्मणामिति वक्ष्यमा
णत्वात् ॥ अकामकर्मणामंतःकरणशुद्ध्या ज्ञानान्मोक्षो भवति ॥ तदुक्तं ॥ कर्मभिः शुध्यसत्व
स्य वैराग्यं जायते हृदीति भागवते ॥ विरक्तानामेव ज्ञानमुक्तं ॥ न तस्य तत्त्वग्रहणाय पुंसाक्षा
समा द्वरीयसीरपि वाचः समासन् ॥ स्वप्ने निरुक्ता गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यादिति ॥
ननु फलाभावात् ॥ कर्माभावात् ॥ अतो न कर्मत्याग एव मोक्षसाधनं ॥ यत्याश्रमस्तु प्राय सर्थो
भगवत्तोषणार्थश्च ॥ अप्रयत्नत्वमेव हि प्रायो गृहस्थादीनामितरकर्मोद्योगात् ॥ अप्रयत्ना
नां च न ज्ञानं ॥ तथा हि श्रुतिः ॥ नाशान्तो नासमाहित इति ॥ महांश्च यत्याश्रमे भगवत्तोषः ॥ तथा
ह्याह ॥ यत्याश्रमं तुरीयं तु दीक्षा मम सुतोषिणीति नारायणाष्टाक्षरकल्पे ॥ आधिकारिकास्तु ॥१८॥
तत्स्थाप्य एव प्रायत्नेऽसमर्थाः ॥ सर्व एव महान् भगवत्तोषः ॥ तदुक्तं ॥ देवादीनामादिराज्ञो महो

स्यागः योगेपिनो मनः॥ विष्णोश्चलतितद्भोगोद्युतीवहरितोषणमितिपूज्ये॥ नतुकर्माणिसर्वाण्य
नायुक्तंशक्यानीत्याह॥ नहीति॥ तथापिशक्तितःकार्यइत्याह॥ कर्मेंद्रियाणीति॥ मनएवबं
धायोजकमितिदर्शयितुमन्वयव्यतिरेकावाह॥ मनसास्मरन्॥ मनसानियम्येति॥ कर्मयोगं
स्थ स्ववर्णाश्रमोचितं॥ ननुगृहेकर्मैवेतिनियमः॥ संन्यासादिविधानात्॥ सामान्यवचनाच्च॥ अ
तोनियतंस्ववर्णाश्रमोचितंकर्मकुरु॥ कर्मणाबध्यतेजंतुरितिकर्मबंधकंस्मृतमित्यत आ
ह॥ यज्ञार्थादिति॥ कर्मबंधनंयस्यलोकस्यसकर्मबंधनः॥ यज्ञोविष्णुः॥ यज्ञार्थंसंगरहितं
कर्मनबंधकमित्यर्थः॥ मुक्तसंगइतिविशेषणात्॥ कामान्यःकामयतइतिश्रुतेश्च॥ अनि
ष्टमिष्टमितिवक्ष्यमाणत्वाच्च॥ एतान्यपितुकर्माणीतिच॥ तस्मान्नेष्टिंयाजुकःस्यादितिच॥
विशेषवचनत्वेसमेपिविशेषणंपरिशिष्यते॥ अत्रार्थवादमाह॥ सहयज्ञाइति॥ हेत्वंतरमाह
॥ अन्नादिति॥ यज्ञःपर्जन्यान्नतात्कारणत्वमुच्यते॥ पूर्वयज्ञविवक्षायांचैतत्केप्रवेशो तस्य
नैंभवति॥ तस्यापाद्यंकर्मविधयेनतुसाम्यमात्रेणदानींकार्यं॥ मेघचक्राभिमानीचपर्जन्यः
सैं

३ कर्मेतरक्रियाकर्मब्रह्मणो जायते ॥ एष ह्येव साधुकर्मकारयतिबुद्धिर्ज्ञानमित्यादिश्रुतेः २ भाष्यं ३

तच्च यज्ञाद्भवति ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः
प्रजाइतिस्मृतेः ॥ उभयत्र वेदार्थानामविरोधः ॥ अतः सांतिहि बहुशरीर फलानि कर्मा
श्च यज्ञात्पर्जन्योद्भवः संभवति ॥ यज्ञो देवतामुद्दिश्य द्रव्यत्यागः ॥ न च मुख्यसंभाव्यमाने पारंपर्येणो
पचारिकं कल्प्यं ॥ न च जडानां स्वतः प्रवृत्तिः संभवति ॥ एतस्यैवाक्षरस्येति सर्वनियमनश्रुतेश्च ॥
द्रव्यैकान्त्यत्येत्यादेश्च ॥ अनित्यशक्तिश्चोक्ता ॥ जीवस्य च प्रतिबिंबस्य बिंबपूर्वे स्तेषा ॥ न कर्तृत
मितित्यादिनिषेधाच्च ॥ अक्षराणि प्रसिद्धानि ॥ तेभ्यो ह्यभिव्यज्यते परं ब्रह्म ॥ अन्यथाऽनादिनिधन
नं मचिंत्यं परिपूर्णमपि ब्रह्म को जानाति ॥ न च रूढिं विना योगांगीकारो युक्तः ॥ परामर्शो चेतस्मात्सर्व
गतं ब्रह्मेति ॥ न ह्येकशब्दे न द्विरुक्तेन भेदश्रुतिं विना वस्तुद्वयं कुत्रचिदुच्यते ॥ तानि चाक्षराणि
नित्यानि ॥ वाचा विरूपनित्यया ॥ अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ॥ अत एव च नित्यत्वमि
त्यादिश्रुतिस्मृतिभगवद्वचनेभ्यः ॥ दोषश्चोक्तः सकर्तृकत्वे ॥ न चाबुद्धिपूर्वमुत्पन्नानि तस्मा
द्वा ॥ निश्वसितत्वादस्व कर्तृत्वमिति यानाप बुद्धिपूर्वाभिप्रायः ॥ सोऽकामयतेत्यादेश्च ॥ इष्ट
णाभावात् ॥ निश्वसितत्वादस्वकर्तृत्वमिति यानाप बुद्धिपूर्वाभिप्रायः ॥ सोऽकामयतेत्यादेश्च ॥ इष्ट
हुतमित्यादिद्रूपत्वेन सहाभिधानाच्च ॥ महातात्पर्यविरोधाच्च ॥ तच्चोक्तं पुरस्तात् ॥ न ह्यस्वा

×× वृत्त्यो दस्व सुषुप्तिः ५

तंत्रेणोत्पत्तिकर्तुः प्राधान्यं ॥ अस्चातंत्र्यंच तद मतिपूर्वकत्वेन भवति ॥ यथा रोगादीनां पुरुषस्य
तज्जन्यत्वेपि ॥ उत्पत्तिवचनान्यभिव्यक्त्यर्थानि अभिमानिदेवताविषयाणि च ॥ नित्यस्य कस्मृष्टेति
वचनात् ॥ अभिव्यंजकेवर्त्तवचनं चास्ति रूपंनशेत पश्यं वक्र इति ॥ कथमादित्यस्क्षा: वेदास्तेन
वचनात् ॥ अभिव्यंजके वर्त्तवचनं चास्ति रूत्सर्न शेत पश्यं वक्र इति ॥ कथमादित्यस्क्षाः वेदास्तेन
वक्रियंते ॥ वचनमात्राच्च निर्णयात्मकशारीरकोक्तं बलवत् ॥ शास्त्रयोनिर्यस्येति तु शास्त्रयोनित्वं ॥
जन्माद्यस्येत्युक्तप्रमाणं हि तत्रापेक्षितं ॥ न तु तस्य जातत्वं वेदकारणत्वं वा ॥ न हि वेदकारणत्वं
जगत्कारणत्वे हेतुः ॥ न हि विचित्रजगत्स्रष्टेः वेदसृष्टिरशक्तस्यास्त्यत्वे ॥ यदि वेदस्रष्टस्स
र्वज्ञः किमिति न जगत्स्रष्टा सर्वज्ञः ॥ तस्माद्वेदप्रमाणकत्वमेवात्र विवक्षितं ॥ अतो नित्यान्यक्ष
राणि ॥ यत एवं परंपरया यत्राभिव्यंग्यं ब्रह्म तस्मात्तन्नित्यं यत्र प्रतिष्ठितं ॥ तानि नित्याक्षराणि
भूताभिव्यंग्यानीति वक्रं ॥ तदेतज्जगच्चक्रं यो नानुवर्तयति स तद्विनाशकत्वादघायुः ॥ पा
पनिमित्तमेव यस्यायुः सोघायुः ॥ तर्ह्यतीव मनसमाधनमपि न कार्यमित्यत आह ॥ यस्त्वि
निमित्तं ति ॥ रमणं परदर्शनादिसुखं ॥ तस्मिन्नन्यत्रालंबुद्धिः ॥ संतोषस्तज्जन्यं सुखं ॥ संतोषस्तृप्ति

कारणमित्यभिधानात् ॥ परमात्मदर्शनादिनिमित्तं सुखं प्राप्तः ॥ अन्यत्र सर्वात्मना त्वं बुद्धिः ॥
॥१८॥ महश्च तत्सुखं ॥ तेनैवान्यत्रात्वंबुद्धिरिति दर्शयति ॥ आत्मन्येवच संतुष्ट इति ॥ तस्यैव
सन्संतुष्ट इत्यर्थः ॥ नान्यत्किमपि संतोषकारणमित्यवधारणार्थः ॥ आत्मनात्मतः ॥ न ह्यात्म
१९ न्यत्वंबुद्धिर्युक्ता ॥ तदाह्यविल्वं च यं तु न विन्द्यामउत मस्मिल्लोके विक्रमे रित्यादिश्रयोगाभि
ध्यं ॥ अध्याहारस्त्वगतिकागतिः ॥ आत्मरतिरेवेत्यवधारणादसंप्रज्ञातसमाधिस्थस्यैव
कार्यं न विद्यते ॥ स्खलत प्रतस्यापि कार्यादेहादिर्दृश्यते यदा स्वधर्मो मम तु ष्ट्यर्थः साहि
सर्वैरपेक्षितेति वचनाच्च पंचरात्रे ॥ अन्यदान्यरतिरपीषत्सर्वस्य भवति ॥ न च तत्रात्वं
बुद्धिमात्रमुक्तं ॥ आत्मतृप्त इति पदयगभिधानात् ॥ कर्तृशब्दः कालावच्छेदेपि न्यायंश्र
सिद्धः ॥ योऽसुईत स तु न ब्रूयादित्यादौ ॥ अतोऽसंप्रज्ञातसमाधावेवैतत् ॥ मानव इति ज्ञा ॥१९॥
निन एवासंप्रज्ञातसमाधिर्भवतीति दर्शयति ॥ मनु अवबोधन इति धातोः ॥ परमात्म
रतिश्चात्र विवक्षिता ॥ विष्णावेव रतिर्यस्य क्रिया तस्यैव नास्ति हीति वचनात् ॥ तस्य कर्म

कालेवक्तव्योहमितिकृत्रित्यसुक्तात्तत्कृतावात्मर[illegible]सधिकसमोवार्थोनास्ति॥ नचसंध्याद
त कृतौकश्चिद्दोषोस्ति॥ नचैदंपहायसर्वेष्वपितेषुकश्चित्प्रयोजनाश्रयः॥ अर्थोयेनदर्शनादि
नाभवतिसोर्थव्यपाश्रयः॥ ज्ञानमात्रेणयद्यपिप्रत्यवायोनभवति॥ तदर्जुनस्यापिसममि
तिनतस्यकर्मोपदेशोपपद्येततद्भवति॥ ईषत्प्रारब्धानर्थस्यकेवलंतद्भवति॥ महर्षेरिवत्वह
स्यादिवत्॥ यतोसंप्रज्ञातसमाधेरेवकार्याभावः॥ तस्मात्सर्वकर्मसमाचर॥ आचारोप्यस्मि
न्नाह॥ कर्मणैवेति॥ कर्मणासहकर्मकुर्वतएवेत्यर्थः॥ कर्मकृत्वैवततोज्ञानंप्राप्येतिवा॥ न
तुज्ञानंविना॥ प्रसिद्धंहितेषांज्ञानित्वंजनकादिषु॥ तमेवंविद्वानमृतइहभवतीत्यादिश्रु
तिभ्यश्च॥ अत्रापिकर्मणांज्ञानसाधनतोक्तेश्च बुद्धियुक्ताइति॥ गतंतरंचनान्यःपंथा
इत्यस्यनास्ति॥ इतरेषांज्ञानद्वाराप्यविरोधः॥ यत्रचतीर्थादेरेवमुक्तिसाधनमुच्यते॥ ब्र
ह्मज्ञानेनवामुक्तिःप्रयागमरणेनवा॥ अथवाकाशीनमात्रेणगोमत्यांकृष्णसन्निधावित्यादौ
तत्रा पापादिमुक्तिःस्तुतिपरतावा॥ तत्रापिहिकुत्रचिद्ब्रह्मज्ञानसाधनत्वमेवोच्यते॥ अन्यथामु

स्तुति

मुक्तिं निषिध्य ॥ ब्रह्मज्ञानं विना मुक्तिर्न कथंचिदपीष्यते ॥ प्रयागादेस्तु या मुक्तिर्ज्ञानोपायत्वमे
॥२०॥ व हीत्यादौ ॥ न च तीर्थादिवाक्यानि तत्प्रशस्तावेवोक्तं ज्ञाननियमं घ्नंति ॥ यथा केचिद्दक्षांस्तयं
प्रयुक्तानि अयमेव राजा किं राज्ञेत्यादीनि ॥ यथाह भगवान् ॥ यानि तीर्थादिवाक्यानि कर्मादि
विषयाणि च ॥ स्तावकान्येव तानि स्युः स्तानां मोहकानि वा ॥ भवेन्मोक्षस्तु मद्दृष्टेर्नान्यतस्तु कथं
चनेति नारदीये ॥ अतोऽपरोक्षज्ञानादेव मोक्षः ॥ कर्म तु तत्साधनमेव ॥ स यद्वाक्यादिकं प्र
माणं कुरुते यदुक्तप्रकारेण तद्वर्ततीत्यर्थः ॥ विद्वदविदुषोः कर्मभेदमाह ॥ प्रकृतेरिति ॥ प्रकृ
तेर्गुणैरिंद्रियादिभिः प्रकृतिमपेक्ष्य गुणभूतानि हितानि ॥ तत्संबंधीनि च ॥ न हि प्रतिबिं
बस्य क्रिया ॥ कर्मभेदस्य गुणभेदस्य च तत्त्ववित् ॥ गुणा इंद्रियादीनि ॥ गुणेषु विषयेषु ॥ प्र
कृतेर्गुणेष्विंद्रियादिषु संमूढाः इंद्रियाद्यभिमानोद्भि विषयादिसंगः ॥ गुणकर्मसु विषयेषु
कर्मसु च ॥ शब्दाद्याइंद्रियाद्याश्च सत्वाद्याश्च गुणानि च ॥ अप्रधानानि च गुणानि गद्यंते निरु ॥२०॥
क्तिग इत्यभिधानात् ॥ सत्वाद्यंगीकारे गुणागुणेष्विति युक्तं स्यात् ॥ अतः सर्वाणि कर्माणि म

ध्या ण्येवसन्यस्यआत्माजीवेद्यौरोपितानिमय्येवविसृज्यभगवानेवसर्वाणिकर्माणिकरोतिइतिम
त्स्वेतिरा॥ आत्मानमधिरुह्य यच्चेतस्तदध्यात्मचेतः॥ सन्यासस्तुभगवान्करोतीतिनिर्ममत्वं
नाहंकरोमीति॥ फलमाह॥ येमइति॥ येत्वेवंनिवृत्तकर्मिणः~~स्ते~~ तेपिमुच्यंतेज्ञानद्वाराकि
णि म्वपरोक्षज्ञानिनः॥ ननुसाधनांतरमुच्यते॥ निवृत्तादीनिकर्माण्यपरोक्षज्ञादृष्टस्य॥ अपरोक्ष
ज्ञादृष्टिस्तुमुक्तौकिंचिन्नमार्गते॥ सर्वंतदंतराध्यायमुक्तयेसाधनंभवेत्॥ नकिंचिदंतराध्या
यनिवीर्णायापरोक्षदृक्कु इतिह्युक्तंनारायणाष्टाक्षरकल्पे॥ अतएवसमुच्चयनियमोपिनिराकृ
तः॥ एवंचेत्किमितितेमतंनानुतिष्ठंतिलोकाइत्यतआह॥ सदृशमिति॥ प्रकृतिःपूर्वसंस्का
रः॥ तथापिशक्तितोनिग्रहःकार्यः॥ निग्रहात्सद्यःप्रयोजनाभावेपिभवत्येवेतिप्रयत्नतइत्या
शयवानाह॥ इंद्रियस्येति॥ तथाह्युक्तं॥ संस्कारोबलवानेवब्रह्माद्याअपितद्वशाः॥ तथापि
सोन्यथाकर्तुंशक्यतेतिप्रयत्नतइति॥ तथाप्युग्रंयुद्धंकर्मेत्यतआह॥ श्रेयानिति॥ बह
वः कर्मकारणाःसंति क्रोधादयःकामश्च॥ तत्रकोबलवानितिपृच्छति॥ अथेति॥ अथेत्ययं

तरं ॥ तयोर्न वशमागच्छेदिति प्रश्नप्रापकं ॥ यस्तु बलान्प्रवर्तकः स एषः कामः ॥ क्रोधोप्येष एव त
॥२९॥ जन्यत्वात् ॥ कामात्क्रोधोभिजायत इति ह्युक्तं ॥ यत्रापि गुरुनिंदादिनिमित्तः क्रोधस्तत्रापि सत्कि
रा न्निंदानिमित्तः कामनिमित्त एव ॥ ये त्वन्यथा वदंति ते संक्रोधस्य सूक्ष्मं जानंति ॥ उक्तं च ॥ क्रले कामं
२२१ न कोपाद्या जायंते हि कथं च नेति महाशनः ॥ महद्धि कामभोग्यं ॥ महान्ब्रह्महत्यादि कारणत्वान्महा
पाप्मा ॥ सर्वपुरुषार्थविरोधित्वाद्वैरी ॥ कथं विरोधीत्यतः ॥ इदमनेनावृतं ॥ यथा धूमेनाग्निरावृ
ग तः प्रकाशरूपोप्यन्येषां सम्यग्दर्शनाय ॥ तथा परमात्मा ॥ यथा दर्शो मलेनावृतो व्याप्तिर्व्यक्ति
हेतुर्न भवति ॥ तथांतःकरणं परमात्मादेर्व्यक्तिहेतुर्न भवति ॥ कामेनावृतं ॥ यथोल्बेनावृत स ब
हिर्भो भवति गर्भस्तथा कामेन जीवः ॥ शास्त्रतो ज्ञातमपि ज्ञानं नैं परमात्मोक्ष परोक्षाय न प्रकाश
ते कामेनावृतं ॥ ज्ञानिनोपि किं त्वज्ञानिनः ॥ कामरूपेण कामाख्येन नित्यवैरिणा ॥ दुष्पूरे ॥२९॥
ण दुःखेन न हि कामः पूर्यते ॥ नहींद्रादिपदे सुखेन लक्ष्यते ॥ यद्यपींद्रादिपदं प्राप्तः पुनर्ब्रह्मादि
पदमिच्छतीत्युक्तं बुद्धिर्नास्तीत्यनलः ॥ उक्तं च ॥ ज्ञानस्य ब्रह्मणश्चाग्नेर्धूमो बुद्धेर्मलं तथा ॥ आ

हि

दर्शस्याथजीवस्य गर्भस्थो लब्धो कामक इति ॥ वधार्थं शत्रोरधिष्ठानमाह ॥ इंद्रियाणीति ॥ ए
तैर्ज्ञानमावृत्य बुध्यादिभिर्हि विषयैर्ज्ञानमावृतं भवति ॥ हताधिष्ठानो हि शत्रुर्नश्यति ॥
शत्रुहनने आयुधरूपं ज्ञानं वक्तुं ज्ञेयमाह ॥ इंद्रियाणीति ॥ असंगज्ञानासिमादाय तत्र रतिया
रमितिह्युक्तं ॥ शरीरादींद्रियाणि पराण्युक्तानि ॥ न केवलं बुद्धेः परः श्रुत्युक्तप्रकारेणाव्य
क्तादपि ॥ अव्यक्तात्पुरुषः पर इति श्रुतिः ॥ न च तत्र तत्रैकैकदेशज्ञानमात्रेण भवति मुक्तिः ॥
सार्वत्रिकगुणोपसंहारो हि भगवता गुणोपसंहारपादेऽभिहितः ॥ आनंदादयः प्रधानस्येत्या
दिना ॥ तथा चान्यत्र ॥ अपौरुषेयवेदेषु विष्णुवेदेषु चैव हि ॥ सर्वत्र ये गुणाः प्रोक्ताः संप्रदा
यागताश्च ये ॥ सर्वैस्तैः सह विज्ञेय ये पश्यंति परं हरिं ॥ तेषामेव भवेन्मुक्तिर्नान्यथा तु कथं
चनेति गारुडे ॥ तस्मादव्यक्तादपि परत्वेन ज्ञेयः ॥ न चात्र जीव उच्यते ॥ रसोप्यस्य परं दृष्ट्वा
निवर्तत इत्युक्तत्वात् ॥ अविज्ञाय परं मत्तो जयः स्यात्कामस्य वै कुत इति च ॥ अतः परमात्म

॥२२॥ कर्म ज्यो

ज्ञानमेवात्र विवक्षितं॥ आत्मानं मनः॥ आत्मनानुध्या॥ ॥इति श्रीमदानंदतीर्थभगव
त्पादविरचितगीताभाष्ये तृतीयाध्यायः॥३॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥बुद्धेः परस्य
माहात्म्यं ज्ञानेस्मिन्दोज्ञानमाहात्म्यं चोच्यतेस्मिन्नध्याये॥ पूर्वानुष्ठितश्चायंधर्म इत्याह॥ इम
मिति॥ मयि सर्वाणीत्युक्तं॥ तन्महात्म्यमादितो ज्ञातुं पृच्छति॥ अपरमिति॥ न तर्हि देवानित्य दिनादि
तआह॥ अपीति॥ अव्ययः आत्मादेहोपि स्वयमात्मा॥ अनंतं विश्वतोमुखमिति रूपविशेष
णमुत्तरत्र॥ एतन्नानावताराणां निधानं बीजमव्ययमिति च॥ जग्रहइतितु व्याप्तिः॥ युक्त
यस्तत्कृताः॥ आत्मानादितं तु सर्वसमं॥ कथमनादिनित्यस्य जनिः॥ प्रकृतिं स्वामधिष्ठायेच्छ
रूपा जातेषु वासुदेवादिषु तथैव तेषां जात इव प्रतीयत इत्यर्थः॥ न तु स्वतंत्रामधिष्ठायेत्याह
॥स्वामिति॥ द्रव्यं कर्म चेति ह्युक्तं॥ सा हि तत्रोक्ता॥ ततः सर्वस्रष्टः॥ आत्ममायया त्मज्ञान
न॥ प्रकृतेः पृथगभिधानात्॥ केतुः केतुश्चितिश्चित्ते क्रतुर्मतिर्मनीषा मायेत्यभिधानं॥ स्व ति ॥२२॥
स्थिकारणया तेषां शरीरादिसृष्ट्यादि माहि कया जात इवाजात एव प्रतीयत वा उक्तं॥ महदादेस्तु

यांमाता याश्रीर्महिमिरिति कल्पिता ॥ विमोहि काश्च दुर्गाख्या ताभिर्विष्णुरजोपिहि ॥ जातव

श्यते ह्यात्मसिद्धत्वान्मूढचेतसामिति ॥ ईश्वरोऽःईशोभ्योपिवरः ॥ ईशेभ्योब्रह्मरुद्रश्रीशेषादि

भ्यायतोसवान् ॥ वरोतईश्वराख्यातेमुख्यानान्यस्य कस्यचिदितिब्रह्मवैवर्ते ॥ समर्थईशइत्यु

क्तत्वद्वराह मीश्वरइतिच ॥ नजन्मनैवपरित्राणादिकंकार्यमितिनियमः ॥ तथापिलील

यास्वभावेनच यथेष्टचारी ॥ तथाह्युक्तं ॥ देवस्यैवस्वाभावायं ॥ लोकवत्तुलीलाकैवल्यं ॥

क्रीडतोबालकस्येवचेष्टांतस्यनिशामय ॥ अरिसयादिवस्चयंपुराद्भवासीद्यदनंतवीर्यः

पूर्णीयमस्यात्रनकिंचिदाप्यंतथापिसर्वंचकुरुतेप्रवृत्तीः ॥ अतोविरुद्धेपुमिमंवदंतिपरावर

ज्ञाःमुनयःप्रशांताइत्याद्येर्ग्वेदखिलेषु ॥ प्रयत्नमुक्तिमुक्तसर्वज्ञाननियमदर्शनार्थं ॥ नतुतावन्मा त्रिः

त्रेणमुक्तिरित्युक्तं ॥ वेदाद्युक्तं तुसर्वं योज्ञातोपास्तेसदाहिमां ॥ तस्यैवदर्शनपथंयामिना

न्यस्यकस्यचिदित्युक्तेश्च महाकौर्मे ॥ अत्रोक्तस्येतज्ज्ञाते वजन्मनेतीतिगतिः ॥ इतरवाक्या

स्य नानान्यागतिः ॥ नान्यस्यकस्यचिदितिविशेषणात् ॥ तत्वतइतिविशेषणाच्चसर्वज्ञानमापतति ॥

यत्रैवं सवति तत्र तत्वत इति विशेषणो[illegible] न विरोधः॥ उक्तं च॥ एकं तत्वतो ज्ञातुं विना सर्वं
॥२३॥ ज्ञ तां नरः॥ न समर्थो महेशोपि तस्मात्सर्वत्र जिज्ञासेदिति स्कांदे॥ संति च तथा मुक्ता इत्याह॥ वी
इ तरागेति॥ मन्मयाः मत्प्रचुराः सर्वत्र मां विना न किंचित्पश्यंतीत्यर्थः॥ न च मद्भजनमात्रेण मु
२३ क्तिः सर्वस्यान्यदेवतादिरूपेण॥ तथापि॥ सर्वेषामानुरूप्येण फलं ददामीत्याह॥ ये यथेति॥ भज
यामि फलदानेन न तु गुणभावेन॥ कथमयं विशेष इत्यत आह॥ मम वर्त्मेति॥ अन्यदेवताय
जंतोपि मम वर्त्मैवानुवर्तंते॥ सर्वकर्मकर्तृत्वात्॥ भोक्तृत्वाच्च मम॥ येप्यन्यदेवताभक्ता इ
ति वक्ष्यति॥ यो देवानां नामधा एक एवेति श्रुतिः॥ भगवानेव च तत्राभिधीयते॥ अजस्य
नावध्यं कर्मार्पितमिति लिंगात्॥ कुतो मम वर्त्मानुवर्तंते॥ क्षिप्रं हि॥ अत एव हि फलप्रा
प्तिः॥ तस्मात्तेधनसनय इति श्रुतिः॥ अहमेव हि कर्तेत्याह॥ चातुर्वर्ण्यमिति॥ चतुर्वर्णसमुदा ॥२३॥
यः॥ सात्विको ब्राह्मणः॥ सात्विकराजसः क्षत्रियः॥ राजसतामसो वैश्यः॥ तामसः शूद्र इति
गुणविभागः॥ कर्मविभागस्तु शमो दम इत्यादिना वक्ष्यते॥ क्रियायां वै लक्षण्या कर्तोप्य

कृती ॥ तथाहि श्रुतिः ॥ विश्वकर्मा विमाना इत्यादि ॥ तनुर्विधा क्रियाकृतिरिति च ॥ साधितं
चेतत्पुरस्तात् ॥ अत एव न मां कर्माणि लिंपंति ॥ इत्यस्य न लिंपंतीत्याह ॥ न मे कर्मफले स्पृहा इ
ति ॥ इच्छामात्रं त्वस्ति ॥ न तु तत्राभिनिवेशः ॥ तदुक्तं ॥ आकांक्षन्नपि देवानां न छेत्तल्लोकेश्वरः च
कामो हि ॥ नह्याग्रहस्तस्य विष्णोर्लोनेनेदस्यास्ति ॥ न स कर्मभिर्मुक्तो भवतीति क्रमेण सर्वमुक्तिः ॥ त
थाहि श्रुतिः ॥ ज्ञात्वा तमेनं मनसा हृदा च भूयो न मृत्युमुपयाति विद्वानिति ॥ कथं वा इत्थं
ता इत्यनंतवदिति होवाचेति ॥ एवं ज्ञात्वापि कर्मकरणे आचारोप्यस्तीत्याह ॥ एवमिति ॥
पूर्वतरं कर्म पूर्वस्मा वीसयर्थः ॥ कर्म कुर्वित्युक्तं ॥ तस्य कर्मणो दुर्विज्ञेयत्वमाह ॥ सम्यक्त्व
लुं किं कर्म किमकर्मेति ॥ न केवलं तज्ज्ञात्वा मोक्ष्यसे ज्ञाते वेत्याशयवानाह ॥ कर्मण इति
॥ तदुक्तं ॥ अज्ञात्वा भगवान्कस्य कर्माकर्म विकर्म कं ॥ दर्शनं याति हि मुनेकुलामुक्तिश्च
तद्विनेति ॥ अकर्म कर्माकरणं ॥ कर्माकर्मान्यद्धि कर्म निषिद्धं कर्मबंधकत्वात् ॥ ततो वि
च्य कर्माकर्मादि बोधव्यमित्यादि ॥ न च वसापादिनाकृवयोप्यत्र मोहिताः ॥ असाकंयचैतज्ज्ञा

तुमित्याह ॥ गहनेति ॥ कर्मादिस्वरूपमाह ॥ कर्मणीति ॥ कर्मणि क्रियमाणे सति अकर्मयः पश्ये
॥२४॥ तू विष्णोरेव कर्म नाहं किंचित्प्रतिबिंबः किंचित्करोमीति ॥ अकर्मणि सुप्त्यादौ अकरणावस्था
यां परमेश्वरस्य यः कर्म पश्यति ॥ अयमेव परमेश्वरः सर्वदा सर्वस्य स्थ्यादि करोतीति ॥
५६ स बुद्धिमान् ज्ञानी स एव च युक्तः योगयुक्तः ॥ सर्वाकरणात् स एव च कृत्स्नकर्मकृत् ॥ कृत्स्न
फलवत्वात् ॥ एतदेव प्रपंचयति ॥ यस्येत्यादिश्लोकपंचकेन ॥ उक्तप्रकारेण ज्ञानाग्निद
ग्धकर्माणं ॥ न च कामसंकल्पाभावेनाल्ले ॥ असंगश्चेहं चयुक्ता ॥ ज्ञानस्वरूपमाह ॥ पु
नर्निसत्स इति ॥ नित्यत्प्र निराश्रयस्वरूपोहमस्मीति तथाविधः ॥ कामादित्यागोपा
यमाह ॥ निराशीरिति ॥ यतचित्तात्माफलानिराशीरित्यर्थः ॥ आत्मा मनः ॥ परिग्रहत्या
गोभिमानं ॥ नैव किंचित्करोमीत्यस्याभिप्रायमाह ॥ नाप्नोति किल्बिषमिति ॥ यतचित्ता ॥२४॥
त्मनो लक्षणमाह ॥ यदृच्छालाभेति ॥ कथं द्वंद्वातीतत्वमित्या[redacted]आह ॥ समः सिद्धाविति ॥ उपसं
हरति ॥ गतसंगस्येति ॥ गतसंगस्य फलभेहरहितस्य मुक्तस्य शरीराद्यनभिमानिनः ॥ ज्ञा

ज्ञानावस्थितचेतसः परमेश्वरज्ञानिनः ॥ ज्ञानावस्थितचेतस्त्वं स्पष्टयति ॥ ब्रह्मार्पणमिति ॥
सर्वमेतद्ब्रह्मेत्युच्यते तदधीनसत्ताप्रतीतित्वात् ॥ न तु तत्स्वरूपत्वात् ॥ उक्तं हि ॥ तदधीनं
यतः सर्वमतः सर्वोसि वानिति ॥ वदंति मुनयः सर्वं न तु सर्वस्वरूपत इति पाद्मे ॥ सर्वत
त्स्वज्ञानेत्र मिति च ॥ एतं ह्येव बह्वृचा इत्यादि च ॥ समाधिनास है ब्रह्मैव कर्म ॥ यज्ञभेदाना
ह ॥ दैवमित्यादिना ॥ दैवं भगवंतं ॥ स एव तेषां यज्ञः ॥ भगवदुपासनं ॥ यज्ञमिति क्रियाविशेष
णं ॥ नान्यत्तेषामस्ति ॥ यतीनां केषांचित् ॥ यज्ञं भगवंतं ॥ यज्ञेन यज्ञं ॥ यज्ञो विष्णुर्देवतेत्या
दिश्रुतिः ॥ यज्ञेन प्रसिद्धेनेव ॥ यज्ञं प्रति जुह्वतीति सर्वत्र संमतं यज्ञमित्यादौ ॥ उक्तं च ॥ वि
ष्णुं रुद्रेण पशुना ब्रह्मा ज्येष्ठेन सूनुना ॥ अयजन्मानसे यज्ञे पितरं प्रपितामह इति ॥ आत्म
संयमाख्यायोग्नौ ॥ द्रव्यं जुह्वतीति द्रव्ययज्ञाः ॥ तपः परमेश्वरार्पणबुध्या तत्र जुह्वतीति त
पो यज्ञा इत्यादि ॥ इदं तपो हविः ॥ एतद्ब्रह्माग्नौ जुहोमीति तत्स्मृत्यर्थमिति होमः ॥ तदर्पण ए
व च होमबुद्धिः ॥ अपरे प्राणायामपरायणाः ॥ प्राणमपाने जुह्वति ॥ अपानं च प्राणे ॥ कुंभकस्था

एवमशवंतीत्यर्थः॥ नियताहारत्वेनैव प्राणरोधात्॥ प्राणान्प्राणेषु जुह्वति॥ यच्छेद्वाङ्मनसी प्राज्ञ
॥२५॥ इत्यादिश्रुत्युक्तप्रकारेण वा॥ अन्यदपि ग्रंथांतरे सिद्धं॥ यदस्यात्माज्ञानं ते न प्राणाः प्राणेषु वै
25 हुता इति॥ ब्रह्मणः परमात्मनो मुखे॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव ही वक्ष्यति॥ मानस तिच
वाचिककायिककर्मजा एव हि ते सर्वे॥ एवं ज्ञात्वा तानि कर्माणि कृत्वा विमोक्ष्यसे॥ युद्धं परित्य
ज्य यन्मोक्षार्थं करिष्यसि तदपि कर्म॥ अतो विहितं न त्याज्यमिति भावः॥ अखिलमुपास
नाद्यंगयुक्तं ज्ञानफलमेवेत्यर्थः॥ इदानीमपि ज्ञान्येव॥ तथाप्यशिक्षितत्वान्मोहः मा तु त्वा॥ ये
न ज्ञानेन मय्यात्मस्वरूपते सर्वभूतान्यथो तस्मादेव मोहनाशाद्रक्ष्यसि॥ कारणभूतं ज्ञानं स्तौ
ति पुनः श्लोकत्रयेण॥ तत्साधनं विरोधिफलं॥ तदुक्तं रुक्मोपसंहरति॥ ॥ इति श्रीमदानं ॥२५॥
दतीर्थभगवत्पादाचार्यविरचितश्रीमद्भगवद्गीताभाष्ये चतुर्थोध्यायः॥ ॥ श्रीकृष्णार्पण
मस्तु॥ ॥ तृतीयाध्यायोक्तमेव कर्मयोगं प्रपंचयत्यनेनाध्यायेन॥ यदृच्छालाभसंतुष्ट इत्या
दिना संन्यासं कुरु कर्मैवेत्यादिना कर्मयोगं च॥ नियमनादिना सकलत्वोक्तकर्तृणा लक्षणः॥

॥ तत्रोक्तं ॥ यतः कर्मसिद्धेर्वेशानियम्यसकलं जगत् ॥ अतो वदंति मुनयः रूपं त्वां ब्रह्मवा
दिन इति महाकोर्मे ॥ सन्न्यासशब्दार्थं भगवानेव वक्ष्यति ॥ अयं प्रश्नाशयः ॥ यदि सन्न्यासः श्रे
योधिकः स्यात्तर्हि सन्न्यासस्य षड्विरोधि युद्धमिति ॥ नायं सन्न्यासो यत्याश्रमः ॥ इदं सागानु
सन्न्यासात्मेत्यूर्जे वगरीयसीति वचनात् ॥ तानिवा एतान्यवराणि ॥ तपांसि न्यास एवात्यरे
चयदिति च ॥ सन्न्यासस्तु तुरीया योनिष्क्रियाख्यः सधर्मकः ॥ न तस्मादुत्तमो धर्मो लोके
कश्चन विद्यते ॥ तद्वक्तापि यद्वच तद्गृहस्थान धार्मिकः ॥ मद्भक्तिश्च विरक्तिश्च तदाधिकारा
हि
निगद्यते ॥ यदाधिकारो भवति ब्रह्मचार्यपि तद्व्रजेत् इति नारदीये ॥ ब्रह्मचर्यादेव प्रव्रजेद्य
दहरेव विरजेदिति च ॥ सन्न्यासस्तु तुरीयं वै प्रीतिर्मम गरीयसी ॥ येषामत्राधिकारो न तेषां
कर्मेति निश्चय इत्यादेश्च ब्राह्मे ॥ अतो नात्राश्रमः सन्न्यास उक्तः ॥ सन्न्यासशब्दार्थमाह ॥ ज्ञेय
इति ॥ सन्न्यासस्य निःश्रेयसकरत्वं ज्ञापयितुं तच्छब्दार्थं स्मारयति ॥ ज्ञेय इति ॥ सन्न्यासो हि त्या
नांतरंगत्वेनोक्तोनतत्तत्सन्न्यस्त तत्त्वग्रहणायेत्यादौ ॥ अतः कथं सा च मद्इत्यत आह ॥ सांख्य योगा

विति॥ उभयोरप्यंतरंगत्वे न विरोधः॥ अग्निर्मुग्धो हृवेधूम्यतांतः स्वर्लोकं न प्रतिजानाति
॥ भावः पदद्ध्यः पितरस्मदाश्रिता यायज्ञशाला सनधूमवर्त्मना मित्यादि काम्यकर्मविषय
॥२६ 26 मितिभावः॥ ये तन्यथा वदंति ते बालाः॥ एकमपीत्यस्याभिप्रायमाह॥ यत्सांख्यैरिति॥ यो
गिभिरपि ज्ञानद्वारा ज्ञानफलं प्राप्यत इत्यर्थः॥ इतश्च सन्यासो योगो वर इत्याह॥ सन्यासस्त्वि
ति॥ योगाभावे मोक्षादिफलं न भवति॥ अतः कामजयादि दुःखमेव॥ तस्य मोक्षाद्येव हि
फलं॥ अन्यत्तत्फलमल्पत्वादफलमेवेत्याशयः॥ तदुक्तं॥ विना मोक्षफलं यत्तु न तत्फलमुदी
र्यत इति पाद्मे॥ यत्तु महत्फलयोग्यं तस्याल्पं फलमेव न भवति॥ यथा पद्मरागस्य तंडुलमु
ष्टिः॥ महाफलश्च योगयुक्तस्यैव सन्यास इत्याह॥ योगयुक्त इति॥ मुनिः सन्यासी॥ तदुक्तं॥
स हि लोके मुनिर्नाम यः कामक्रोधवर्जित इति॥ एतदेव प्रपंचयति॥ योगयुक्त इति॥ सर्वभू ॥२६॥
तात्मभूतः परमेश्वरः॥ यच्चाप्नोतीत्यादेः॥ स आत्मभूतः स्वसमीपं प्रसादानादिकर्ता यस्य स
सर्वात्मभूतात्मभूतात्मा॥ सन्यासं स्पष्टयति पुनः श्लोकद्वयेन॥ सन्यासयोगयुक्त एव कर्मणा न

नलिप्यत इत्याह ॥ ब्रह्मणीति ॥ साधननियमस्योपसंहारत्वनिवृत्त्यर्थं पुनः पुनः कथनं ॥ एवं फल

साचार इत्याह ॥ कायेनेति ॥ पुनर्युक्तादिनियमनार्थं युक्तायुक्तफलमाह ॥ युक्त इति ॥ यो युक्तो

गयुक्तः ॥ पुनः संन्यासशब्दार्थं स्पष्टयति ॥ सर्वकर्माणीति ॥ मनसेति विशेषणादभिमान

त्यागः ॥ नैव करोति वस्तुत इत्याह ॥ न कर्तृत्वमिति ॥ प्रभुर्हि जीवो जडमपेक्ष्य ॥ ज्ञानमेवाज्ञा

ननाशकमित्याह ॥ ज्ञानेनेति ॥ प्रथमज्ञानं परोक्षं ॥ अपरोक्षज्ञानावहितसाधनमाह ॥

तद्बुद्धय इति ॥ परमेश्वरस्वरूपाणां सर्वत्र साम्यदर्शनं चापरोक्षज्ञानसाधनमित्याशयवा

नाह ॥ विद्येति ॥ तदेवस्तौति ॥ इहैवेति ॥ संन्यासयोगज्ञानानि मिलित्वा प्रपंचयन्सध्या

यशेषेण ॥ पुनर्योगस्याधिक्यं स्पष्टयति ॥ बाह्यस्पर्शेष्विति ॥ कामरहितमात्मनियतसुखं

विंदति स एव ब्रह्मयोगयुक्तात्मा च तदेवाक्षयं सुखं विंदति ॥ ब्रह्मविषयो योगो ब्रह्मयोगः

॥ ध्यानादियुक्तस्यैवात्मसुखमक्षयं ॥ अन्यथा नेत्यर्थः ॥ संन्यासार्थं कामभोगं निंदति ॥ य

येहीति ॥ तत्परित्यागं प्रशंसति ॥ शक्नोतीति ॥ कामक्रोधोद्भवं वेगं सोढुं शक्नोति ॥ श

रीरविमोक्षणात्प्राक् ॥ यथा मनुष्यशरीरे सोढुं शक्यं तथा नान्यत्रेति भावः ॥ ब्रह्मलोका
॥२७॥ दिस्तु जितकामानामेव सम्भवति ॥ शान्तिलक्षणं च परं यत्तूत्तरे लोके ॥ आरामः पर
27 दर्शनादिनिमित्तं सुखं ॥ अत्र तु परमात्मदर्शनादिनिमित्तं ॥ तत्सुखं तूपद्रवक्षये व्यक्तं ॥ तु॥
अत्र तु कामादिक्षये व्यक्तमात्मसुखं ॥ स्वयं ज्योतिष्ट्वाद्भगवतस्तद्व्यक्तेरन्तर्ज्योतिः स
र्वेषामंतर्ज्योतिष्ट्वेपि व्यक्तेर्विशेषः ॥ असंप्रज्ञातसमाधीनां बाह्यादर्शनात् ॥ दर्शनेप्य
किंचित्करादेवशब्दः ॥ उक्तं चैतत् ॥ दर्शनस्पर्शसंभाषाद्यसुखं जायते नृणां ॥ आरामः
स्वतु विज्ञेयः सुखं कामक्षयादिजमिति नारदीये ॥ स्वज्योतिष्ट्वान्महाविष्णोरंतर्ज्योति
श्रुतस्थित इतिच ॥ अंतःसुखत्वादेः कारणमाह ॥ ब्रह्मणिभूत इति ॥ पापक्षयाद्वैतद्भव
तीत्याह ॥ लभंत इति ॥ क्षीणकल्मषाः भूत्वा छिन्नद्वैधा यतात्मानः ॥ द्वैधाभावो द्वैधं ॥ संशयो ॥२७॥
तु विपर्ययो वा ॥ तथोक्तं ॥ विपर्ययः संशयो वा यद्वैधं तं हत्वात्मनो ॥ ज्ञानासिना तु तच्छित्वा

मुक्तसंगः परं व्रजेदिति ॥ छिन्नद्वैधास्त एव यतात्मानः ॥ दीर्घमनसः सर्वज्ञा इत्यर्थः ॥ तत्तैव
व छिन्नद्वैधाः ॥ तदुक्तं ॥ क्षीणपापा महात्मानो जायंते गतसंशया इति ॥ छिन्नद्वैधा यता
त्मन इति वा ॥ सुलभं चतेषां ब्रह्मेत्याह ॥ कामक्रोधेति ॥ अखिलतः सर्वतः ध्यानप्रकारमाह ॥
स्पर्शानित्यादिना ॥ बाह्यान्स्पर्शान्बहिः कृत्वा श्रोत्रादीनि योगेन नियम्येत्यर्थः ॥ चक्षुर्भ्रुवोरं
तरे कृत्वा भ्रुवोर्मध्यमवलोकयन्नित्यर्थः ॥ उक्तं च ॥ नासाग्रे वा भ्रुवोर्मध्ये ध्यानी चक्षुर्नि
धारयेदिति ॥ प्राणापानौ समौ कृत्वा कुंभकस्थित इत्यर्थः ॥ ध्येयमाह ॥ ओंकारमिति ॥ ॥
॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितगीताभाष्ये पंचमोध्यायः ॥ ५ ॥ श्रीकृ
माधियोग ष्णार्पणमस्तु ॥ ॥ ज्ञानांतरंगं सा[illegible]माहानेनाध्यायेन ॥ विवक्षितं सन्यासमाह ॥ योगेन सहा
नाश्रित इति ॥ चतुर्थाश्रमिणाप्यग्निक्रिये वोक्ता ॥ देवमेवेत्यादौ अग्निर्ब्रह्म च तत्कृता क्रिया
न्यासाश्रमस्थले इति च ॥ तस्मान्निरग्निरक्रियः सन्यासी योगी च न भवत्येव ॥ सन्यासोपि या

गांतर्भूतइत्याह ॥ यं संन्यासमिति ॥ कामसंकल्पाद्यपरित्यागे कथमुपायवान्स्यादित्याशयः ॥
॥२८॥ कियत्कालं कर्म कर्तव्यमित्यत आह ॥ आरुरुक्षोर्मुनेरिति ॥ योगमारुरुक्षोरुपायवृत्तिमिच्छोः ॥
२८ योगारूढस्य संपूर्णोपायस्यापरोक्षज्ञानिन इत्यर्थः ॥ कारणं परमसुखकारणं ॥ अपरोक्षज्ञा
निनोपि समाध्यादि फलमुक्तं ॥ तस्य सर्वोपशमेन समाधिरेव कारणं प्राधान्येनेत्यर्थः ॥ तथापि
यथाशोकव्योपरमस्तदेव सम्यगसंप्रज्ञातसमाधिर्जायते ॥ अन्यदा भगवच्चरितादौ स्थितिः ॥
तच्चोक्तं ॥ यत्वां पश्यंति भगवंस्त एव सुखिनः परं ॥ तेषामेव च सम्यक्तु समाधिर्जायते न्नृणां ॥
भोक्तव्यो [illegible] कर्मण्यक्षीणे जपेन कथयापि वा ॥ वर्तयंति महात्मानस्त्वद्भक्तास्त्वत्परायणा इति ॥
योगारूढस्य लक्षणमाह ॥ यदेति ॥ सम्यगननुषंगस्तस्यैव भवति ॥ उक्तं च ॥ स्वतो दोषत्कयोर्ह ॥२५॥
र्ध्वाप्लितरेषां प्रयत्नत इति ॥ स च योगारोहः प्रयत्नेन कर्तव्य इत्याह ॥ उद्धरेदित्यादिना ॥ कस्य बं
धुरात्मेत्यत आह ॥ बंधुरात्मेति ॥ आत्मा मनः ॥ आत्मनो जीवस्य ॥ आत्मना मनसा ॥ आत्मानं जीवं ॥
आत्मैव मनः ॥ आत्मना बुध्या जीवेनैव वा ॥ स हि बुध्या विजयति ॥ उक्तं च ॥ मनः परं कारणमाम

नंति ॥ मन एव मनुष्याणां कारणं बंधमोक्षयोः ॥ उद्धरेन्मनसा जीवं न जीवमवसादयेत् ॥ जीवस्य बं
धुः शत्रुश्च मन एव न संशयः ॥ जीवेन बुध्या हि यदा मनो जितं तदा बंधुः शत्रुरन्यत्र चास्य ॥ ततो जये
द्बुद्धिबलेन नरस्तद्देवेत्युक्तं सत्यामधुकैटभारावित्यादि ब्रह्मवैवर्ते ॥ अनात्मनः अजितात्मनः पुरुष
स्य ॥ अजितमनस्कस्य सदपि मनो नुपकारी यन्नात्मा ॥ सन्नपि शत्रुत्वो यस्य नश्वरस्य पदे वर्तते सहाय्स
त्यः ॥ तस्यात्मा मन एव शत्रुवच्छत्रुत्वे वर्तते ॥ जितात्मनः फलमाह ॥ जितात्मन इति ॥ जितात्मा हि प्र
शांतो भवति ॥ न तस्य मनः प्रायो विषयेषु गच्छति ॥ तदा च परमात्मा सम्यक् हृद्याहितः संनिहितो
भवति ॥ अपरोक्षज्ञानी स भवतीत्यर्थः ॥ अपरोक्षज्ञानिनो लक्षणं स्पष्टयति ॥ शीतोष्णेत्यादिना ॥
शीतोष्णादिषु कूटस्थः ॥ ज्ञानविज्ञानतृप्तात्मा विजितेंद्रिय इति कूटस्थत्वे हेतुः ॥ विज्ञानं विशेष
ज्ञानं ॥ अपरोक्षज्ञानं वा ॥ तच्चोक्तं ॥ सामान्यैर्यत्तु विज्ञेया विशेषाममगोचराः ॥ देवादीनां तु तज्ज्ञा
नं विज्ञानमिति कीर्तितं ॥ श्रवणान्मननाच्चैव यज्ज्ञानमुपजायते ॥ तज्ज्ञानं दर्शनं विष्णोर्विज्ञानं शं
भुरब्रवीत् ॥ विज्ञानं ज्ञानमंगादेर्विशिष्टं दर्शनं तथेत्यादि ॥ कूटस्थो निर्विकारः ॥ कूटवत्स्थित इति

प्रसक्तेः॥ कूटमाकाशं॥ कूटस्थं विदलं व्योमसंधिराकृत्य उच्यते इत्यभिधानात्॥ योगी यो
॥२९॥ गं कुर्वन्॥ युक्तः योगसंपूर्णः॥ एवंभूतो योगानुष्ठाता योगसंपूर्ण उच्यत इत्यर्थः॥ सेवक स
२९ र्वस्माद्विशिष्यते॥ साधु पापादिषु समबुद्धि जीवेषु चितः॥ परमात्मनः सर्वस्य तन्निमित्तत्वस्य च
॥ सर्वत्रैकरूप्येण॥ चिद्रूपा एव हि जीवाः॥ विशेषस्त्वंतःकरणकृतः॥ सर्वेषां साधुत्वादिकं सर्व २
मीश्वरकृतमेव स्वतो न किंचिदपि॥ उक्तं चैतत्सर्वं॥ स्वतः सर्वेपि चिद्रूपाः सर्वदोषविवर्जिताः॥
जीवास्तेषां तु ये दोषास्त उपाधिकृता मताः॥ सर्वं चेश्वरतस्तेषां न किंचित्स्वत एव तु॥ समा ए
व ह्यतः सर्वे वैषम्यं भ्रांतिसंभवं॥ एवं समानजीवास्तु विशेषो देवतादिषु॥ स्वाभाविकस्तु नि
यमादत एव सनातनः॥ असुरादेस्तथा दोषा नित्याः स्वाभाविका अपि॥ गुणदोषौ [illegible] मनु ॥२९॥
ष्याणां नित्यौ स्वाभाविकौ मतौ॥ गुणैकमात्ररूपास्तु देवा एव सदा मता इति ब्राह्मे॥ ननु साधु
पापादीनां पूजादिसाम्यं॥ तत्र दोषस्मृतेः॥ समानां विषमा पूजा विषमाणां समा तथा॥ क्रिय
ते येन देवोपि स्वपदाद्भ्रश्यते पुमानिति पाद्मे॥ वित्तं बंधुर्वयः कर्म विद्या रेव पंचमी॥ एतानि

मत्ता

मान्यस्खानानिगरीयोद्युत्तरोत्तरमितिनैर्मने ॥ गुणानुसरणी पूज्ञां स महार्षिंचयोनरः ॥ स
र्वस्कृतेषु कुरुते तस्य विष्णुः प्रसीदति ॥ वैषम्यमुत्तमत्वं तु ददाति न्तरसंचयात् ॥ पूज्ञायावि
षमादृष्टिः समासाम्यं विदुःखज्जमिति ब्रह्मवैवर्त्ते ॥ सुहृदादिषु शास्त्रोक्त पूज्ञादिषु न्यूनतिर
न्यूनाःनधिकाया सापिसमातदप्याह ॥ यथा सुहृत्सु कर्तव्यं पितृमातृसुतेषु च ॥ तथा करो
ति पूज्ञादि समबुद्धिः स उच्यत इति गारुडे ॥ प्रत्युपकारनिरपेक्षयापकारं कृत्वा सुहृत्क्लेशस्थ
नं निरूप्य यो रक्षां करोति स मित्रं ॥ अरिर्वधादिकर्त्ता ॥ कर्तव्ये उपकारे यउदास्ते स उदासीनः
॥ कर्तव्यमुभयमपि यः करोति समध्यस्थः ॥ अवासितकृत् द्वेष्यः ॥ आह चैतत् ॥ द्वेष्य अवा
सितकृत् कार्यमात्रकारी तु मध्यमः ॥ प्रियकृत्प्रियो निरूप्यापि क्लेशं यः परिरक्षति ॥ स मित्रम
पकारं तु द्वेषेन पेक्ष्यापकारकृत् ॥ यस्ततः स सुहृत्प्रोक्तः शत्रुश्चापि वधादिकृदिति ॥ समाधि
योगप्रकारमाह ॥ योगी युंजीत सततादिना ॥ युंजीत समाधियोगयुक्तं कुर्यात् ॥ आत्मानं म
नः ॥ योगं समाधियोगं युंज्यात् ॥ निर्वाणपरमां शारीरत्यागोत्तरकालीनां ॥ अनशनादिनि

शत्रु

अपकारे

षेध्योऽभ्यासकस्य॥ उक्तं हि॥ निद्राशनभयश्वासचेष्टालस्यादिवर्जनं॥ कृत्वा निमीलिताक्षस्तु शक्तो
॥३०॥ ध्यायन्प्रसिध्यति॥ इति नारदीये॥ युक्ताहारविहारस्येत्यपायाहारादेर्यावतात्रमाद्यभावो भ
वति तावदाहारादेरित्यर्थः॥ आत्मनि भगवति॥ आत्मनः भगवद्विषयं योगं॥ आत्मना मनसा॥ आ
३० त्मनि देहे॥ आत्मानं भगवंतं पश्यंस्ततो भगवद्रूपात्॥ दुःखसंयोगो येन वियुज्यते स दुःखसंयोग
वियोगः॥ न केवलमुत्पन्नं दुःखं नाशयति॥ उत्पत्तिमेव निवारयतीति दर्शयति॥ संयोगशब्देन नि
श्चयेन योक्तव्यः॥ योक्तव्य एव बुद्ध्या पुण्येत्यर्थः॥ सर्वान्सर्वविषयान्॥ अशेषतः एकदेशोऽपि कामः ष
व स्वल्पः कादाचित्कोऽपि न कर्तव्य इत्यर्थः॥ मनसैव नियंतुं शक्यते नान्येनेत्येवशब्दः॥ बुद्धेः कारणत्वं
मनोनिग्रहे आत्मरमणे च॥ यतो यतो यत्र यत्र॥ यता यूता धावतीत्यादिप्रयोगात्॥ आत्म
न्येव वशं नयेत् आत्मविषयमेव वशीकुर्यादित्यर्थः॥ पूर्वोक्तश्लोकोक्तं प्रपंचयति॥ एवं युंजन्नि
ति॥ ध्येयमाह॥ सर्वभूतस्थमिति॥ सर्वभूतस्थमात्मानं परमेश्वरं॥ सर्वभूतानि चात्मनि ॥३०॥
परमेश्वरे॥ तं च परमेश्वरं॥ ब्रह्मात्तृणादावैश्वर्यादिना साम्येन पश्यति॥ तदुक्तं॥ आत्मानं स

सर्वभूतेषु भगवंतमुपस्थितं ॥ अपश्यत्सर्वभूतानि भगवत्यपि चात्मनीति ॥ समं सर्वेषु भूतेषु
तिष्ठंतं परमेश्वरमिति च ॥ फलमाह ॥ यो मामिति ॥ तस्याहं न प्रणश्यामीति सर्वदा योगक्षे
ममवहः स्यामित्यर्थः ॥ स च मे न प्रणश्यति सर्वदा मद्भक्तो भवतीत्यर्थः ॥ सत्यपि स्वामिन्यरस्य ना क्ष
हि थः ॥ एवं चरेयप्यसज्जयस्य भ्रंस इति प्रसिद्धिः ॥ उक्तं च ॥ सर्वदा सर्वभूतेषु समं मां यः प्रपश्यति
॥ अचलात्तस्य सक्तिः स्याद्योगक्षेमं वहाम्यहमिति गारुडे ॥ एतदेव स्पष्टयति ॥ सर्वभूतस्थि
तं मिति ॥ एकत्वमास्थितः सर्वत्रैक एवेश्वर इति स्थितः ॥ सर्वप्रकारेण वर्तमानोपि मय्येव
वर्तते एवमपरोक्षं पश्यतो ज्ञानफलं नियतमित्यर्थः ॥ तथापि प्रायो नाधर्मं करोति ॥ कुर्वत
२ स्तु महद्दुःखं स्वल्पकं भवतीत्युक्तं पुरस्तात् ॥ आह च ॥ कदाचिदपि नाधर्मे बुद्धिर्विष्णुदृ
शां भवेत् ॥ प्रमादात्तु कृतं पापं स्वल्पं भस्मीभविष्यति ॥ आदिराजैस्तथा देवैः ऋषिभिः क्रिय
ते क्रियत् ॥ बाहुल्यात्कर्मणस्तेषां दुःखं स्वल्पकमेव तदिति ॥ साम्यं प्रकारांतरेण व्याचष्टे ॥ आ
त्मौपम्येनेति ॥ एतस्य योगस्य स्थिरां स्थितिं न पश्यामि ॥ मनसश्चंचलत्वात् ॥ उक्तं च ॥ मनसश्चं

चलत्वाद्धि स्थितिर्योगस्यैवेस्थिरा॥ विनाभ्यासं न शक्तास्याद्वैराग्याद्वा न संज्ञा यइति॥
॥३१॥ भ्यासयोगे॥ न चैकदाचित्स्थिरमेव मनो नियम्यते॥ स्पृहेच्छारहितानां तु द्वेषिणां च रमापते॥
नास्तिकानां च वै पुंसां सदा मुक्तिर्न जायत इति निष्कालूब्राह्मे॥ अयतिरप्रयत्नः॥ योगस्य
३१ जिज्ञासुरपि॥ ज्ञातव्यामयायोग इतियस्यातीवेच्छा सोपि शब्दब्रह्मातिवर्त्तते॥ परं ब्रह्म प्रा
प्नोतीत्यर्थः॥ नैकजन्मनीत्याह॥ प्रयत्नादिति॥ जिज्ञासुर्ज्ञात्वा प्रयत्नं करोति॥ एवमनेक
जन्मभिः संसिद्धापरोक्षज्ञानी भूत्वा परां गतिं याति॥ आह च॥ अतीवश्रद्धयायुक्तो जिज्ञा
सुर्विष्णुतत्परः॥ ज्ञात्वा ध्यात्वा तथा दृष्ट्वा जन्मभिर्बहुभिः पुमान्॥ विशेन्नारायणं देवं
नान्यथा तु कथंचनेति नारदीये॥ ज्ञानिभ्यः योगज्ञानिभ्यः॥ तपस्विभ्यः कृच्छ्रादिचारिभ्यः
॥उक्तं च॥ कृच्छ्रादेरपि यज्ञादेर्ध्यानयोगो विशिष्यते॥ तत्रापि शेषश्रीब्रह्मशिवादिध्या ॥३१॥
नतो हरेः॥ ध्यानं कोटिगुणं प्रोक्तमधिकं वा मुमुक्षुणामिति गारुडे॥ अज्ञात्वा ध्यायिनो
ध्यायिनाध्याना ज्ञानमेव विशिष्यते॥ ज्ञात्वा ध्यानं ज्ञानमात्राध्यानादपि तु दर्शनं॥

दर्शनाद्येवसक्तेस्य न किंचित्साधनाधिकमितिनारदीये॥ ॥इतिश्रीमदानंदतीर्थभ
गवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये षष्ठोध्यायः॥६॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥
साधनं प्राधान्येनोक्तमतीतैरध्यायैः॥ उत्तरैस्तु षड्भिर्भगवन्माहात्म्यमेव प्राधान्येनाह॥ आ
सक्तमना अतीवस्नेहयुक्तमनाः॥ मदाश्रयः सगवानेवमयासर्वं कारयति॥ स एव परमेश
रणं॥ तस्मिन्नेवाहं स्थित इति स्थितः॥ असंशयं समग्रमिति क्रियाविशेषणं॥ इदं मद्विषयं
ज्ञानं॥ विज्ञानं विशेषज्ञानं॥ दौर्लभ्यं ज्ञानस्याह॥ मनुष्याणामिति॥ प्रतिज्ञातं ज्ञानमाह॥ भू
मिरित्यादिना॥ महलोऽहंकारएवांतर्भावः॥ अपरा अनुत्तमा नक्ष्यमाणमपेक्ष्य॥ जीवभूता श्री
जीवानां प्राणधारिणी॥ चिद्रूपा भूता सर्वदा सती॥ एतन्महद्भुतमिति श्रुतेः॥ जगादच॥ प्रकृती
द्वेतु देवस्य जडा चैवा जडा तथा॥ अव्यक्ताख्या जडा सा च स्रष्ट्या भिन्नाष्टधा पुनः॥ महान्बुद्धिर्म
नश्चैव पंचभूतानि चेतिह॥ अवरा सा जडा श्रीश्च परेयं धार्यते यया॥ चिद्रूपा सा त्वनंता च अनादि
निधना परा॥ यत्समं तु प्रियं किंचिन्नास्ति विष्णोः परात्मनः॥ नारायणस्य महिषी मता सा ब्रह्मणो

पिहि ॥ ताभ्यामिदं जगत्सर्वं हरिः सृजति सूत्तराउिति नारदीये ॥ नकेवलं तेजोंशस्तीमदस्मीइ
॥३२॥ त्येतावन्मदैश्वर्यमित्याह ॥ अहमिति ॥ प्रभवादेः सत्ताप्रतीत्यादिकारणत्वात् तद्वोतत्वाच्च प्रभ
वइत्यादि ॥ तथा च श्रुतिः ॥ सर्वकामः सर्वकर्मा सर्वगंधः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यना
३ दर इति ॥ आहच ॥ स स्रष्टा पाता च संहर्ता नियंता च प्रकाशिता ॥ यतः सर्वस्य तेनाहं सर्वोस्मीस्व
सु सिद्धिः सकलः ॥ सुखरूपस्वभोक्तृता न तु सर्वस्वरूपतः ॥ आगमिष्यत्सुखं चापि तज्ज्ञास्येव सदा
पि तु ॥ तथाप्यचिंत्यशक्तित्वाज्जातं सुख सुखमतीव रतिनारदीये ॥ अहमेव परतरः ॥ मत्तोन्य
त्परतरं न किंचिदपि ॥ इदं ज्ञाने ॥ रसोहमित्यादि विज्ञानं ॥ अवादयोपि तत एव ॥ तथापि रसादिस्व
भावानां शेषाणां रसस्वभावत्वे सारत्वे च विशेषतोपि नियामकः ॥ न तत्वादिनियमनुबद्धा ॥ रसादिस्त
सारत्वादिश्चेति दर्शयति ॥ अप्सु रस इत्यादि विशेषशब्दैः ॥ भोगश्च विशेषतो रसादेरिति च ॥ उपा
सनार्थं च ॥ उक्तं च गीताकल्पे ॥ रसादीनां रसादित्वं स्वभावत्वे तथैव च ॥ सारत्वे सर्वधर्मेषु विशेष ॥३२॥
व्यापिकारणं ॥ सारभोक्ता च सर्वत्र यतोतो जगदीश्वरः ॥ रसादिमानिनां देहे स सर्वत्र व्यवस्थितः ॥
अवादयः पार्षदा ये ध्येयः सज्ञानिनो हरिः ॥ रसादि संपत्या अन्येषां वासुदेवो जगत्पतिरिति स्व

शावोजीव एव च ॥ सर्वस्वभावो नियतस्तेनैव किमुतापरं ॥ न तदस्ति विना यस्यात्मयाप्नुतं चरा
चरमिति च ॥ धर्माविरुद्धः कामरागविवर्जितमित्याद्युपासनार्थं ॥ उक्तं च गीतासु त्वं ॥ धर्माविरु
द्धकामेसात्वुपास्यः काममिच्छता ॥ विहीनं कामरागादेर्बलं च बलमिच्छता ॥ ध्यातस्तत्र त्वनिच्छद्भि
र्ज्ञानमेव ददाति स इत्यादि ॥ पुण्यागंधइति सागापेक्षया च ॥ तथा च श्रुतिः ॥ पुण्यमेवामुं गच्छति न
ह वै देवान्पापं गच्छति ॥ ऋतं पिबंतौ सुकृतस्य लोके इत्यादिका ॥ ऋतं पुण्यं ॥ ऋतं सत्यं तथा धर्मः
सुकृतं चाभिधीयते इत्यभिधानात् ॥ ऋतं तु मानसो धर्मः स संस्यात्सप्रयोगतः इति च ॥ न चानश्न
न्न्योऽभिचाकशीति ॥ अन्यो निरंभोपि बलेन भूयानित्यादि विरोधिः स्थूलानशनोक्तेः ॥ आ
हरसूक्ष्माशनं ॥ प्रविविक्ताहारतर इवैव स्य स व स्यस्माच्छरीरादात्मनः ॥ न चात्र जीव उच्यते ॥ शा
रीरादात्मन इति भेदाभिधानात् ॥ स्वप्नादिस्थः शारीर एव ॥ शारीरस्तु त्रिधा भिन्नो जाग्रदादिष्व
वस्थितेरिति वचनात् गारुडे ॥ अस्मादित्तीश्वरव्यावृत्यर्थं ॥ शारीरो तावुभौ ज्ञेयो जीवश्चेश्वरसं
ज्ञितः ॥ अनादिबंधनस्त्वेको नित्यमुक्तस्तथा पर इति वचर्भारदीये ॥ स एष सुतेश्च सति गयंत

ना

वी

रेपुरुषसेदएवकल्पयेनववस्यात्सेदः॥ आहर॥ प्रविविक्तस्मुच्यतोह्यस्माच्छरीरात्पुरुषोत्तमः॥ अ
॥३३॥ तोऽसोकारभोक्तावस्थूलाभोगात्सदेवविति गीताकल्पे॥ नत्वहंतेष्विति तदनाधारत्वमुच्यते॥
उक्तंच॥ तदाश्रितंजगत्सर्वं नासौ कुत्रचिदाश्रितइति गीताकल्पे॥ तर्हि कथमेवंज्ञायस इत्य न
त आह॥ त्रिभिरिति॥ तादात्म्यार्थे मयट्॥ तत्रोक्तं॥ तादात्म्यार्थे विकारार्थे प्राचुर्यार्थे मयट् त्रि
धेति॥ नहि गुणकार्यस्त्वतामामायागुणमयीति वक्ष्यति॥ सिद्धं च कार्यस्यापितादात्म्यं॥ तादा
त्म्यं कार्यधर्मादेः संयोगोभिन्नवस्तुनामिति व्याससयोगे॥ भावैः पदार्थैः॥ सर्वं भावा दृश्य मात्मा
गुणमया एत इति दर्शयति॥ एभिरिति॥ ज्ञानिव्याख्यार्थमिदमिति॥ गुणमयदेहादिकं दृष्ट्वे
श्वरदेहोपि तादृशइति माया मोहित इत्यर्थः॥ जगादच व्याससयोगे॥ गौणान्ब्रह्मादिदेहा
ति दीन्दृष्ट्वा विष्णोरपीदृशाः॥ देहादिरिमन्वानो मोहितो ह्यजनोऽक्षरमिति॥ एभ्यो गुणमयेभ्यः
॥ गुणेभ्यश्च परमिति वक्ष्यमाणत्वात्॥ केवलो निर्गुणश्चेत्यादि श्रुतिभ्यश्च॥ त्रैगुण्यवर्जि ॥३३॥
तमिति चोक्तं॥ कथमनादिकालं मोहानत्ययो बहूनामित्यत आह॥ देवीति॥ अयमाशयः॥

मायाह्येषा मोहिका॥ सत्त्वस्थ इत्यादि क्रीडमद्देवसंबंधित्वादिति शक्ते दुरत्यया॥ तथाहि दे
वशब्दार्थं पठंति॥ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिषु
इति॥ कथं दैवी मदीयत्वात्॥ अहं हि देव इति॥ अब्रवीच्च॥ श्रीर्ह्रीर्दुर्गेति यासिन्ना महा
मायातु वैष्णवी॥ तच्छक्तिनैतांशहीनाऽथापि तस्याश्रयात्सतः॥ अनंतब्रह्मरुद्रादेर्ना
स्याः शक्तिकलांशपि हि॥ तेषां दुरत्ययाप्येषा विना विष्णुप्रसादत इति व्यासयोगे॥ त
र्हि न कथंचिदसौ तर्तुं शक्यत इत्यत आह॥ मामेवेति॥ अन्यत्सर्वं परित्यज्य मामेव ये प्रपद्यंते
॥ गुर्वादिवंदनं च मय्येव समर्पयंति॥ स एव तत्र स्थित्वा गुर्वादि सेवतीत्यादि पश्यंति॥
॥ आह च नारदीये॥ मत्संपन्ना वा गुर्वादीन्भजंते मध्यमा नराः॥ मदुपाधितया तांश्च सर्वे
भृत्ता निद्योतमा इति॥ आचार्यचैत्यवपुषा स्वगतिं व्यनंक्षीति च॥ तर्हि किमिति सर्वे ना
ति त्वायंतीत्यत आह॥ न मामिति॥ दुष्कृतिनो मूढाः॥ अत एव नराधमाः॥ अपहृतज्ञानत्वाच्च
मूढाः॥ अत एवासुरं भावमाश्रिताः॥ स च वक्ष्यते॥ प्रवृत्तिं च निवृत्तिं चेत्यादिना॥ अपहारो

भिभवः ॥ उक्तं चैतदध्यात्मयोगे ॥ ज्ञानं स्वभावो जीवानां माययावाभिभूयत इति ॥ असुषुर
ता असुराः ॥ तथोक्तं नारदीये ॥ ज्ञानप्रधाना देवास्तु असुरास्तु रता असाविति ॥ एकस्मि
॥३४॥ न्नेव भक्तिरित्येकभक्तिः ॥ तथोक्तं गारुडे ॥ मय्येव भक्तिर्नान्यत्र एकभक्तिः स उच्यत इति ॥ ब
34 हूनां जन्मनामन्ते ज्ञानवान् भवति ॥ तथोक्तं ब्राह्मे ॥ जन्मभिर्बहुभिर्ज्ञानी ततो मां प्रतिपद्यत इति
॥ प्रकृत्या स्वभावेन ॥ स्वभावः प्रकृतिश्चैव संस्कारो वासनेति चेत्यभिधानात् ॥ यां यां ब्रह्मा
दिरूपां तनुं ॥ उक्तं च नारदीये ॥ अन्तो ब्रह्मादिभक्तानां मद्भक्तानामनन्ततेति ॥ मुक्तश्चैकां गतिं ग
च्छेन्मोक्षश्चैव किमामक इत्यादेः ॥ परिहारसंदर्शनाच्च मोक्षधर्मेषु ॥ अवतारे महाविष्णोर्भक्तः
कुत्र न मुच्यत इत्यादेश्च ब्रह्मवैवर्ते ॥ को विशेषस्तवान्येभ्य इत्यत आह ॥ अव्यक्तमिति ॥ का
र्यदेहादिवर्जितं ॥ तर्ह्यानिव प्रतीयत इत्यत आह ॥ व्यक्तिमापन्नमिति ॥ कार्यदेहाद्यापन्नं ॥ ॥३४॥
तथोक्तं ॥ सदसतः परं ॥ न तस्य कार्यं ॥ अपाणिपादः ॥ आनंददेहं पुरुषं मन्यन्ते गौणदेहिकामि
त्यादौ ॥ भावं याथार्थ्यं ॥ तथा ब्रवीच्च ॥ याथातथ्यमजानन्तः परं तस्य विमोहिता इत्यादि ॥ अज्ञानं त
मदिच्छयेत्याह ॥ नाहमिति ॥ योगेन सामर्थ्योपायेन मायया च ॥ मयैवमूढो नाभिजानाति ॥ तथाह

विषय

पाशे॥ आत्मनः प्रारतिं चैव लोकचित्तस्य बंधनं॥ स्वसामर्थ्येन देव्यासकुरुते स महेश्वर इति

नरमां माया बध्नातीत्याह॥ वेदेति॥ नकस्य नातिसमर्थोपि स्वसामर्थ्यात्॥ द्वंद्वमोहेन सुखदुःखा

दिमोहेन॥ इच्छाद्वेषयोः प्ररद्वयानीहि किंचिद्वातुंशक्तं॥ कारणांतरमेतत्॥ सर्गसर्गकाले आ

रभ्यैव॥ शरीरे हि सतीच्छादयः॥ एवंविज्ञानमात्रं॥ विपरीताश्च केचित्संतीत्याह॥ एषामि

ति॥ जरामरणमोक्षाय तत्यन्यकामनिरत्यर्थं॥ मोक्षे सक्तिः स्तुत्यर्थं वानविधिः॥ मुमुक्षोरमुमु

क्षुस्तु वरो ह्येकांतसक्तिमागितीतरस्तु ते नारदीये॥ नास्ति कमितित्र॥ देवानां गुणलिंगा

नामानुश्राविककर्मणां॥ सत्वएवैकमनसो वृत्तिः स्वाभाविकीतु या॥ अनिमित्ता भगवति भक्तिः

सिद्धेर्गरीयसी॥ जरयत्याशु या कोशं निगीर्णमनलो यथेति भागवते लक्षणाच्च॥ आहच॥ स

र्वे वेदास्तु देवार्था देवा नारयणार्थकाः॥ नारायणस्तु मोक्षार्थो मोक्षो नान्यार्थ इष्यते॥ एवं मध्य

मस्सका नामेकांतानां न कस्यचित्॥ अर्थ नारायणो देवः सर्वमन्यत्तदर्थकमिति गीताकल्पे॥

त एव च विदुः॥ यमेवैषऽरणुत इतिश्रुतेः॥ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितगी

तात्पर्यबोधिन्यां सप्तमोध्यायः॥७॥ श्रीकृष्णार्पणमस्तु॥ ॥मरणकालकर्तव्य गत्यादीनस्मिन्नध्या

॥३५॥ ये उपदिशति॥ परममक्षरं ब्रह्म॥ कदादिशंकाव्याख्यार्थमेतत्॥ आत्मन्यधिकृत्य अध्यात्मं॥ य

आत्माधिकारे यत्तदिति वा। तथाहि जैवः स्वभावः॥ स्वा स्व्याभाव इति व्युत्पत्त्या जीवो वा स्वभा

व। सर्वदास्यैवैकप्रकारेणेति भावेन॥ अंतःकरणादिव्याख्यायोभावशब्दः॥ नह्येकप्रकार

णस्थितिरंतःकरणादेः॥ विकारित्वात्॥ स्वशब्दः ईश्वरव्याख्यार्थः॥ भूतानां जीवानां भावा

नां जडपदार्थानां चोद्भवकृत्स्वरक्रियाविसर्गः॥ विशेषणसर्जनं सर्ग इत्यर्थः॥ भूतानि सश वि

रीरान्जीवानधिकृत्य यत्तदधिभूतं॥ क्षरोभावः विनाशी कार्य पदार्थः॥ अन्य त्कांतपत्नीवेपित

स्याप्यन्यथाभावस्वा विनाशोस्त्येव॥ तच्चोक्तं॥ अव्यक्तं परमे व्योम्नि निष्क्रियं संप्रली

यत इति॥ तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमेति च॥ विकारो व्यक्तजन्म हीति यत्स्कां

दे॥ पुरि शयानात्पुरुषो जीवः॥ स च संकर्षणो ब्रह्मा वा॥ स सर्वदेवानकंस्य पतिरित्यधिदैवतं धि

देवाधिकारस्थ इति वा॥ सर्वयज्ञभोक्तृत्वादेरधियज्ञः॥ अन्योऽधियज्ञोऽस्मादिः प्रसिद्ध ॥३५॥

इति देहविशेषणं ॥ ओंकारं यज्ञतपसां ॥ त्रैविद्या मां ॥ ये प्यन्यदेवताभक्ताः ॥ एतस्य वा अक्ष
रस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसंति यजमानं देवा इत्यादेः ॥ कुतोह्यस्य ध्रुवः स्वर्गः
कुतो नैःश्रेयसं पदमित्यादि परिहाराश्च मोक्षधर्मे ॥ भगवांश्चैतज्ञात्वोक्तादेरधियज्ञत्वं सिद्धमि
ति कथमित्यस्य परिहारः पृथङ्नोक्तः ॥ सर्वप्राणिदेहस्थ्विष्णुरूपेणाधियज्ञः ॥ अत्रेति स्वदेहनि
रस्यर्थं ॥ न तत्रैश्वरस्य नियंतृत्वं पृथगस्ति ॥ नात्रोक्तं ब्रह्मभगवतान्यत् ॥ तं ब्रह्मेत्युक्त
साधिभूताधिदैवं मां साधियज्ञं च ये विदुरिति परामर्शात् ॥ तस्यैव च प्रश्नात् साधियज्ञ
मिति भेदप्रतीतेः ॥ तामेव स्पष्टमधियज्ञोहमित्युक्तं ॥ मामित्यस्य दसिद्धं रक्षरमित्येवोक्तं ॥
आह च गीताकल्पे ॥ देहस्थ विष्णुरूपाणि अधियज्ञ इतीरितः ॥ कर्मेश्वरस्वस्वरूप्यात्वं तज्ञा
पीब्रह्ममुच्यते ॥ अधिभूतं जडं प्रोक्तमध्यात्मं जीव उच्यते ॥ हिरण्यगर्भोधिदैवं देवः संक
र्षणोपि वा ॥ ब्रह्मनारायणो देवः सर्वदेवेश्वरेश्वर इति ॥ यथाप्रतीतं वा सर्वत्रैनेव निषिध्यत इ म
ति ॥ स्कांदेच ॥ आत्माभिमानाधिकारस्थितमध्यात्ममुच्यते ॥ देहाद्बाह्यं विनातीव बाह्यतत्त्व

॥२६॥

३८

दधिदैवतं॥ देवाधिकारगंसर्वं महाभूताधिकारगं॥ तत्कारणं तथा कार्य मधिभूतं तं न दं तिका
लं इति महाकोर्मेच॥ अध्यात्मं देहपर्यंतं केवलात्मोपकारकं॥ स देह जीवाभूतानि यतेषामुप
कारकं॥ अधिभूतं तु मायां तद्देवाना मधिदैवत मिति॥ मद्भावं मयि सत्तां निर्दुःखनिरतिशय
यानंदात्मिकां॥ तद्योक्तं॥ मुक्तानां च गति ब्रह्मन् क्षेत्रज्ञ इति कल्पितइ ति मोक्षधर्मे॥ स्मरंस्त्यज न्पुरुष
तीति भिन्नकालीनत्वेप्य विरोधइति मंदमतेः शंका मा भूदिति अंतइति विशेषणं॥ सुमतेर्नैव
शंकावकाशः॥ स्मरंस्त्यजतीत्येककालीनत्वप्रतीतेः॥ दुर्मतेर्दुःखाभ्यस्मरंस्त्यजतीति भविष्यति
शंका॥ त्यजन्देहं न कश्चित्तु मोहमाप्नोति संशयमिति स्कांदे॥ तस्य हैतस्य हृदयस्याग्रं प्रद्योत
ते॥ तेन प्रद्योतेनैष आत्मा निष्क्रामतीति हि श्रुतिः॥ सदा तद्भावभावितइति अंतकाल स्मरणो तते
पायमाह॥ भावोंतर्गतं मनः॥ तथाभिधानात्॥ भावितत्वमसिवासितत्वं॥ भावनात्वतिवास
नेत्यभिधानात्॥ सदा तद्भावभावितत्वं स्पष्टयति॥ अभ्यासेति॥ अभ्यास एव योगोऽभ्यासेयो ॥२६॥
गः॥ दिव्यं पुरुषं पुरिशयं पूर्णं च॥ स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किंचनानावृतं ना

नैनेन किंचनासंवृतं मिति श्रुतेः॥ दिव्यंस्तुत्यादि क्रीडायुक्तं॥ दिवु क्रीडेति धातोः॥ ध्येयमाह॥
दि कविमिति॥ कविं सर्वज्ञं॥ यः सर्वज्ञ इति श्रुतिः॥ त्वं कविः सर्ववेदनादिति ब्राह्मे॥ धातारं धारणपो
षणकर्तारं॥ डुधाञ् धारणपोषणयोरिति धातोः॥ धाता विधाता परमोत संदृगिति च श्रुतिः॥ ब्र
ह्मास्थाणुरित्यारभ्य तस्य प्रसादादिच्छंति तदादिष्ट फलां गतिमित्यादि च मोक्षधर्मे॥ तमसो व्यक्ता
त्परतः स्थितं॥ तमसः परस्तादिति॥ अव्यक्तं वै तमः परस्ताद्धि सततमिति पिप्पलादशाखायां॥
मृत्युर्वा तमः॥ मृत्युर्वै तमो ज्योतिरमृतमिति श्रुतेः॥ वायुजयादि योगयुक्तानां मृतिकाले कृ
ज्ञान त्यमाह॥ विशेषतः प्रयाणकाल इति॥ वायुजयादिरहितानामपि भक्तिवैराग्यादिसंपूर्णा
नां भवत्येव मुक्तिः॥ तद्वतां तीषज्ज्ञानाद्यसंपूर्णानामपि निपुणानां तद्बलात्कथंचिद्भवतीति
विशेषः॥ उक्तं च भागवते॥ पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये॥ वैराग्यसा
रं प्रतिलभ्य बोधं यथांजसान्वापुरकुंठधिष्ण्यं॥ तथापरे चात्मसमाधियोगबलेन जित्वाप्र
कृतिं बलिष्ठां॥ त्वामेव धीराः पुरुषं विशंति तेषां श्रमः स्यान्न तु सेवया त इति॥ ये तु तद्भाविताल्मो

॥३७॥ 37

के प्रक्रांतिं त्वं समाश्रिता: ॥ एतदस्याधिकं तेषां तत्तेज: प्रविशंत्युत इति च मोक्षधर्मे ॥ संपूर्णानां सर्वे
न्मोक्षो विरहितानां नपत्तिभि: ॥ नियमेन तथापीरजन्यादिषु तु योगिनां ॥ वश्यत्वान्मनसस्त्रीषह्नु
र्वमप्याप्यते ध्रुवमिति च व्यासयोगे ॥ तदेव सध्येयं प्रपंचयति ॥ यदक्षरमित्यादिना ॥ प्राप्यते मुमु
क्षुभिरिति पदं स्वरूपं ॥ पद गतावित्ति धातो: ॥ तद्विष्णो: परमं पदमिति श्रुतेश्च ॥ गीयसे पद
मित्येव मुनिभि: पद्यसे यत इति च नारदीये ॥ ब्रह्मनाडीं विना यद्यन्यत्र गच्छति तर्हि विनामो
क्षं स्यानांतरं प्राप्नोतीति सर्वद्वाराणि संयम्य ॥ निर्गच्छंश्चक्षुषा सूर्यं दिश: श्रोत्रेण वैवहीसा
दिवचनाद्व्यासयोगे ॥ मोक्षधर्मे च ॥ हृदि नारायणे ॥ ह्रियते तया जगद्यस्माद्धृदि सर्वं प्रभाव्य स
इति पाद्मे ॥ नहि मूर्ध्नि प्राणस्थितेर्हृदि मनस: स्थिति: संभवति ॥ यत्र प्राणो मनस्तत्र तत्र जीव:
परस्त्वथेति व्यासयोगे ॥ योगधारणामास्थित: योगधारणया एवाभियुक्त इत्यर्थ: ॥ नित्ययुक्त ॥३७॥
स्य नित्योपायवत: ॥ योगिन: परिपूर्णयोगस्य ॥ तत्साधितं स्तौति ॥ मामिति ॥ परमां सिद्धिं ग
तां हि त इति तत्र हेतु: ॥ महामेरुस्थ ब्रह्मसदनमारभ्य न पुनरावर्त्ति: ॥ तद्योक्तं नारायणगोपालकल्पे ॥

आमेरुब्रह्मसदनादाजनाभजनिर्भुवि॥ तथाब्रह्मभावः सर्वं त्रप्राप्येवव सुदेवजमिति॥ मांप्रा
प्यनपुनरावर्तिरितिस्थापयितुं मव्ये त्वाख्यास्तसामर्थ्यंदर्शयितुंप्रलयोदिदर्शयति॥ सह
स्रयुगेत्यादिना॥ सहस्रशब्दोत्रानेकवाची॥ ब्रह्मपरं॥ सान्निध्यरूपस्य रजनीतिश्रुतिः॥ द्विपरा
र्धप्रलयएवात्रविवक्षितः॥ अव्यक्ताद्व्यक्तयः सर्वाइत्युक्तेः॥ उक्तंचमहाकौर्मे॥ अनेकयुगप
र्यंतमहर्विष्णोस्तथानिशा॥ रात्र्यादौलीयतेसर्वमहरादौचजायतइतिच॥ यःससर्वेषुभूते
ष्विति वाक्यशेषाच्च॥ अव्यक्तोभगवान्॥ यंप्राप्यननिवर्ततइति मामुपेत्यतुत्कस्यपरा
मर्शात्॥ अव्यक्तंपरमंविष्णुमितिश्रयोगाच्च गारुडे॥ धामंस्वरूपं॥ तेजः स्वरूपंचगृहं प्रा
हुर्धामेतिकथ्यतइत्यभिधानात्॥ परमसाधनमाह॥ पुरुषइति॥ यत्कालाद्यभिमानिदे
वतागता आवृत्यनावृत्तीगच्छंतितान्आह॥ यत्रेत्यादिना॥ कालइत्युपलक्षणं॥ अग्न्यादेर
पिवक्ष्यमाणत्वात्॥ ज्योतिरर्चिः॥ तेर्चिषमभिसंभवंतीतिहिश्रुतिः॥ तथा चनारदीये॥ अग्निं
प्राप्यततश्चार्चिस्ततःप्राप्याहरादिकमिति॥ अभिमानिदेवताश्चाग्न्यादयः॥ कथमन्यथा

अहनापूर्यमाणपक्षमितियुज्यते॥ दिवादिदेवताभिस्तु पूजितो ब्रह्म याति हीति च ब्राह्मे॥
॥श्री॥ 38 मासाभिमानिस्योऽयनाभिमानी न पृथक्॥ तच्चोक्तं गारुडे॥ पूजितस्त्वयनेनासौ मासैः परिवृ
तो नहीति॥ अहरग्निर्ज्जिता॥ शुक्लं पौर्णिमास्या॥ अयनं विषुवासह॥ तच्चोक्तं ब्रह्मवैवर्ते॥ सा
क्षान्मध्यंदिनेनाथ शुक्लेन च सपूर्णिमा॥ सविषुवायनेनासौ पूजितः केशवं व्रजेदिति च
॥ एते सृती सोपाये ज्ञात्वानुष्ठायन मुह्यति॥ तच्चाह स्कांदे॥ सृती ज्ञात्वा तु सोपाये अनुष्ठाय
च साधनं॥ न कश्चिन्मोहमाप्नोति न चान्या तत्र वै गतिरिति॥ ॥इति श्रीमदानंदतीर्थभग
वत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये अष्टमोध्यायः॥ ८॥ ॥श्रीकृष्णार्पणमस्तु॥
सप्तमाध्यायोक्तस्य स्पष्टता अस्मिन्नध्याये॥ राजविद्या प्रधानविद्या॥ प्रत्यक्षं ब्रह्मावगम्यते
येन तत्प्रत्यक्षावगमं॥ अक्षेष्विंद्रियेषु प्रतिप्रतिस्थितमिति प्रत्यक्षः॥ तथा च श्रुतिः॥ यः ॥श्री॥
प्राणे तिष्ठन्प्राणादंतरो यं प्राणो न वेद यस्य प्राणः शरीरं यः प्राणमंतरो यमयत्येष त आ
त्मांतर्याम्यमृतः॥ यो वाचि तिष्ठन्॥ यश्चक्षुषि तिष्ठन्नित्यादेः॥ य एषोंतरक्षिणि पुरुषो

दृश्यत इति च॥ अंगुष्ठमात्रः पुरुषो अंगुष्ठं च समाश्रित इति च॥ त्वं मनस्त्वं चंद्रमास्त्वं चक्षुरादित्य — सामवेदे
इत्यादेश्च मोक्षधर्मे॥ स प्रत्यक्षः प्रतिहि सो क्षेप्वक्षवान्हि सपश्यति य एवं विद्वान्प्रत्यक्षं वेदेति वारु
णशाखायां॥ धर्मो भगवान्॥ तद्विषयं धर्म्यं॥ सर्वं जगद्धृत इति धर्मः॥ पृथ्वी वा धर्ममूर्धनीति
प्रयोगान्मोक्षधर्मे॥ भारस्तत्कुथितो योगीति च॥ भर्तासन्म्रियमाणो बिभर्तीति च श्रुतिः॥ धर्मो
वा इदमग्र आसीत्॥ न पृथिवी न वायुर्नाकाशो न ब्रह्मा न रुद्रो न देवा न ऋषयः साध्या इति च सा — य
मवेदे बाभ्रव्यशाखायां॥ प्रत्यक्षावगमं स्पष्टेनापरोक्षज्ञानसाधनत्वमुक्तं॥ तज्ज्ञानाद्याह॥ म — इस्तत
येति॥ तर्हि किमिति न दृश्यते आह॥ अव्यक्तमूर्तिनेति॥ मत्स्यत्वेपि यथा पृथिव्यां स्थूलत्वास्थि
तानि न तथा मयीत्याह॥ न चेति॥ न दृश्यश्चक्षुषा वाचा सो न स्पृश्यः स्पर्शनेन नवेति हि मोक्षधर्मे॥
संशासंशेति च॥ ममात्मा देहे एव स्थूलभावनः॥ महाविष्णुते माहात्म्यशरीरे तिहि मोक्षधर्मे॥ म
स्यानिन च मस्यानीत्यस्य दृष्टांतमाह॥ यथाकाशस्थित इति॥ न ह्याकाशस्थितो वायुः स्पर्शा — पि
द्याप्नोति॥ ज्ञानप्रदर्शनार्थं प्रलयादि प्रपंचयति सर्वभूतानीत्यादिना॥ प्रकृत्य न वष्टंभस्तु यथाक
श्चित्समर्थोपि पादेन गंतुं लीलया दंड मवष्टभ्य गच्छति॥ सर्वभूतगुणैर्युक्तं नैव त्वं ज्ञातुमर्हसी

तिमोक्षधर्मे ॥ सर्वभूतगुणैर्युक्तं देवं मां ज्ञातुमर्हसीति च ॥ विदित्वा सप्त सूक्ष्माणि षडंगं च महे
॥९॥ श्वरं ॥ प्रधानविनियोगस्थः परब्रह्माधिगच्छतीति च ॥ न कुत्रचिच्छक्तिरनंतरूपा विहन्यते
तस्य महेश्वरस्य ॥ तथापि मायामधिरुह्य देवः प्रवर्ततेस्रष्टिविलापनेष्वितिऋग्वेदखिलेषु ॥
३९ सर्वोप्यनंतगुणोनंतगुणतोनंतविग्रहइतिभागवते ॥ अथ कस्मादुच्यते परं ब्रह्म बृहति बृंहयति
चेत्याथर्वणे ॥ परास्य शक्तिर्विविधैव श्रूयत इति च ॥ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि वि
ममे रजांसि ॥ न ते विष्णो जायमानो न जातो देव महिम्नः परमंतमापेत्यादेश्च ॥ प्रकृतेर्वशादवशं ॥
त्वमेवैतत्सर्जने सर्वकर्मण्यनंतशक्तोपि स्वमाययैवं मायावशं वा वशो लोकमेतत्तस्मात्त्वध्यक्षस्या
सि पासीशविष्णो इति गौतमखिलेषु उदासीनवत् उदासीनः ॥ तदर्थमाह ॥ असक्तमिति ॥ अवाक्य तू
नादर इति हि श्रुतिः ॥ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ॥ यदनुग्रहतः संति न संति यदुपे
क्षयेति भागवते ॥ यस्या सत्त्वे च सर्वकर्मशक्तिः ॥ कुतस्तस्य सर्वकर्मबंध इति भावः ॥ न कर्म
णा वर्धते नो कनीयानिति हि श्रुतिः ॥ यः कर्मापि नियमयति कथं च तत्त्वं बध्नाति ॥ उदासीनवदि ॥३५॥
ति चेत्स्वयमेव प्रकृतिः सूयत इत्यत आह ॥ मयेति ॥ प्रकृतिस्तु निद्रष्टा अहमवेत्यर्थः ॥ तथा च कर्ता
श्रुतिः ॥ यतः प्रसूता जगतः प्रसूती तोयेन जीवान्व्यससर्ज भूम्यामिति ॥ तर्हि केचित्कथं त्वामव

जानंति कायते यां गतिरित्यत आह ॥ अवजानंतीत्यादिना ॥ मानुषीं तनुं ॥ मूढानां मनुष्यवत्प्रती
तं ॥ न तु मनुष्यरूपं ॥ उक्तं च मोक्षधर्मे ॥ यत्किंचिदिह लोके वै देहबद्धं विशांपते ॥ सर्वं पंच
भिराविष्टं भूतैरीश्वरबुद्धिजैः ॥ ईश्वरो हि जगत्स्रष्टा प्रभुर्नारायणो विराट् ॥ भूतांतरात्मा व
रदः सगुणो निर्गुणोपि च ॥ भूतप्रलयमव्यक्तं शुश्रुम नृपसत्तम ॥ इति च ॥ अवतारप्रसंगे वै
तदुक्तं ॥ अतो नावताराश्च पृथक् शंक्याः ॥ रूपाण्यनेकान्यस्य प्रादुर्भावसवायसः ॥ वारा ज
हं नारसिंहं च वामनं मानुषं तथेति ॥ तत्रैव प्रथमसर्गकाल एवावतारस्वरूपविस्तरमुक्तेः ॥
अतो न तेषां मानुषत्वादिविनाभांति ॥ भूतमहदीश्वरं चेति भूतमहेश्वरं ॥ तथा हि वाष्कव्य
शाखायां ॥ अनाद्यनंतं परिपूर्णरूपमीशं वराणामपि देववीर्यमिति ॥ अस्य भूतस्य महे
तो निश्वसितमिति च ॥ ब्रह्मपुरोहिते ब्रह्मविकायिक महताजिकेति च मोक्षधर्मे ॥ तेषां फलम
ग मोघाशा इति ॥ वृथाशाः ॥ भवद्वेषिभिराशासितमामुष्मिकं न किंचिदाप्यते ॥ मज्ञादिकर्मा
णि च तेषां वृथैव ॥ ज्ञानं च केनापि ब्रह्मरुद्रादिभक्त्याद्युपायेनैकश्चित्पुरुषार्थ आमुष्मिकस्ते
न

त राप्यइत्यर्थः ॥ वक्ष्यति च ॥ तानहं द्विषतः क्रूरान् संसारेष्वित्यादि ॥ मोक्षधर्मे च ॥ कर्मणा मनसा
॥५०॥ वाचा यो द्विष्याद्विष्णुमव्ययं ॥ मज्जंति पितरस्तस्य नरके शाश्वतीः समाः ॥ यो द्विष्याद्विबुध
६० श्रेष्ठं देवं नारायणं हरिं ॥ कथं स न स्वेनू द्वेष्यः आलोकोस्तस्य कस्य चितु इति ॥ सर्वोत्कृष्टे ज्ञान
स्तव्योहि यस्य नारायणे पुष्करे विश्राद्धे ॥ सर्वो वमो द्वेषयुतस्य तस्मिन्कृष्णानंत घोप्यस्य समा
नद्वेषा नचैवेति सामवेदे शांडिल्यशाखायां ॥ कामात्स्नेहाद्भयाद्यथा सन्नोऽश्वरे मनः ॥ आवेश्य तद
घं हित्वा बहवस्तद्गतिं गताः ॥ गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ॥ संबंधाद्वृष्णयः स्ने
हाद्यूयं भक्त्या वयं विभो ॥ वैरेण यं नृपतयः शिशुपालपौंड्र साल्वादयो गतिविलासविलोकना
द्यैः ॥ ध्यायंत आकृतधियः शयनासनादौ ॥ साम्यमीयुरनुरक्तधियः पुनः किमित्यादि तु भागवते ॥
भक्तप्रियत्वख्यापनार्थं नित्यध्यानस्तुत्यर्थं च ॥ स्वसक्तस्य कदाचिच्छापबलात् द्वेषिणोपि सक्तिफ ॥५०॥
लं भगवान्ददातीति ॥ न च्छापवद्धि पूर्वं शिशुपालादयः शापबलात्तु द्वेषिणः ॥ तस्मिन्ने पूर्वपा
र्षदत्वशापादिकथनाच्चैतज्ज्ञायते ॥ अन्यथा किमिति तदप्रस्तुतमुच्येत ॥ भगवतः साम्यकथ
नं तु द्वेषिणामपि द्वेषमनिरूप्य पूर्वतनभक्तिफलमेव ददातीति ख्यापयितुं ॥ नमेद्वेष्योस्ति नप्रियःइत्यती

त्विक्ष्यति ॥ न च भावो हि सत्त्वकारणमित्यादिविरोधः ॥ द्वेषभावं विना हि द्वेषएव भवतीति हि यु
क्तं ॥ अन्यथा गुरुद्वेषिणामपि गुरुत्वं भवतीत्यनिष्टमापद्येत ॥ न चाल्पत्वधीत्वे विशेषः ॥ तेषामेव
वहिरण्यकशिप्वादीनां पापप्रतीतेः ॥ हिरण्यकशिपुश्चापि भगवन्निंदयातमः ॥ विविक्षुरत्यगा
त्सूनोः प्रह्लादस्यानुभावत इति ॥ यदनिंदत्पिता मह्यं त्वद्भक्तेमयि राघवान् ॥ इत्याद्यारभ्य तस्मात्पि
तामेघ्रयेतदुरंताद्दुस्तराद्घात् ॥ इति प्रह्लादेन भगवतो याचनाच्च ॥ बहुषु ग्रंथेषु निषेधः कुत्र वर
चे चिदेवतदुक्तिरितिविशेषः यस्मिंस्तदुच्यते तत्रैव निषेधउक्तः ॥ महातात्पर्यविरोधश्चोक्तः पुर
चे स्तात् ॥ अयुक्तिमद्वयो युक्तिमत्त्वेवबलवं तिवाक्यानि ॥ युक्तः पश्चोक्तोन्येषां ॥ नैतेषां काचिद्य अ
तिः ॥ सौम्येपिवाक्ययोर्लोकानुकूलाननुकूलयोर्लोकानुकूलमेवबलवत् ॥ लोकानुकूलत्वं
चभक्तप्रियत्वं नेतरत् ॥ उक्तं च तेषां श्वभक्तत्वं ॥ मन्येसुरान्भागवतांस्त्र्यधीशे संरंभमार्गाभिनि
विष्टचित्तानित्यादि ॥ अतो न भगवद्द्वेषिणां काचिद्गतिरिति सिद्धं ॥ द्वेषकारणमाह राक्षसीमि
ति ॥ नेतरेद्विषंतीति दर्शयितुं देवानाह ॥ महात्मान इत्यादिना ॥ सर्वत्रैकएव नारायणः स्थित इत्ये

कत्वेन ॥ पृथक्त्वेन सर्वतो वैलक्षण्येन ॥ बहुधा हि रूपमाम्नाति ॥ शुक्लमिव लोहितमिवाथो नीलमि
वाथो ऽर्जुन मिति हि सनत्सुजातीये देवमेवापरइत्युक्तप्रकारेण बहवो बहुधा ॥ प्रतिज्ञातं विज्ञा ॥४१॥
नमाह ॥ अहं क्रतुरित्यादिना ॥ क्रतवोऽग्निष्टोमादयः ॥ यज्ञो देवतामुद्दिश्य द्रव्यत्यागः ॥ उद्दिश्य दे
वान् द्रव्याणां त्यागो यज्ञ इतीरितइत्यभिधानात् ॥ गम्यते मुमुक्षुभिरिति गतिः ॥ तथा हि सामवेदे ५।
वासिष्ठशाखायां ॥ अथ कस्मादुच्यते गतिरिति ब्रह्मैव गतिस्तद्धि गम्यते पापविमुक्तैरिति
साक्षादीक्षत इति साक्षी ॥ तथा हि बाष्कलशाखायां ॥ स साक्षादिदमद्राक्षीद्यदद्राक्षीत्तत्सा
क्षिणः साक्षित्वमिति ॥ शरणमाश्रयः संसारभीतस्य ॥ परमं यः परायणमिति ह्युक्तं ॥ नारायणं म
प्रकृत्या हाज्ञेयं विश्वात्मानं परायणमिति च ॥ संहारकाले जगदत्र निधीयत इति निधानं ॥ तथा ह्यग्वेद
रिवहेषु ॥ अपश्यमव्ययेमायया विश्वकर्मण्यदो जगन्निहितं स्पुष्णच क्षुरिति ॥ सत्कार्यमसत्का
रणं ॥ सदव्यक्तरूपत्वात्कार्यमित्युक्तं बुधैरिति ॥ असदव्यक्तरूपत्वात्कारणं चापि साधितं ॥४१॥
मित्यभिधानात् ॥ असच्च सच्चैव च यद्विश्वं सदसतः परमिति चमास्तते ॥ तथापि मद्भजनमे

वान्यदेवताभजनाद्दूरमितिदर्शयति ॥ त्रैविद्यादृत्यादिना ॥ अनन्याः अन्यदचिंतयित्वा ॥ तथाहि
गौतमखिलेषु ॥ सर्वं परित्यज्य मनोगतं यद्विनादेवं केशवं शुद्धमाद्यं ॥ येचिंतयंतीह तमेव धीरा
अनन्यास्तदेव मेवाविशंतीति ॥ कामं कालेन महता एकांतित्वात्समाहितैः ॥ शक्यो द्रष्टुं स भगवान्प्र
भासंदृश्यमंडलइतिच मोक्षधर्मे ॥ नित्यमभितः सर्वतोयुक्तानां ॥ तर्ह्यहं क्रतुरित्याद्युक्तसमित्यतआ
ह ॥ येपीति ॥ कारणमाहाविधिपूर्वकत्वे ॥ अहं हीति ॥ फलं विविच्याह ॥ यांतीति ॥ दुर्बलैस्त्वं पूजयि
टीका। तुमशक्यो महत्वादित्यत आह ॥ पत्रमिति ॥ नन्वविहितपत्रादि ॥ तस्यापराधत्वलोकेवीत्याहादौ ॥ भक्त्यो
वाहं तुष्टइतिभावः ॥ सत्यप्रियं सकललोकनमस्कृतं चेतिभारते ॥ एतावानेवलोकेऽस्मिन्पुंसः
स्वार्थः परः स्मृतः ॥ एकांतभक्तिर्गोविंदे यत्सर्वत्रात्मदर्शनं ॥ अलोयत्करोषि ॥ तर्हि स्नेहादिमत्वाद
न्ययत्तत्स्यापि कस्यचिद्धु फलं ददासि विपरीतस्यापि कस्यचिद्विपरीतमित्यत आह ॥ समोहु
मिति ॥ तर्हि न भक्तिः प्रयोजनमित्यत आह ॥ येभजंतीति ॥ मयि ते तेषु चाप्यहमिति मम ते वशाः
स्तेषामहं वशा इति ॥ उक्तं च पैंगिखिलेषु ॥ यत्वेवै भजंते परमं पुमांसं तेषां वशः स तु तद्वशाश्चेति ॥ ते

तद्दृशा एवते सर्वे सर्वदा ॥ तथापि बुद्धिपूर्वकापूर्वकत्वेन भेदः ॥ उद्धवादिवच्छिशुपालादिवच्च ॥ तत्रोदि
॥४२॥ क्तं तैत्रेयैव ॥ अबुद्धिपूर्वो घोषस्तस्य ध्यानात्पुनर्वेशो भवते बुद्धिपूर्वमिति ॥ न भवत्येव प्रायस्त
५२ द्भक्तो दुराचरस्तथापि बहुपुण्यन यदि कथं विद्भवति तर्हि साधुरेव मन्तव्यः ॥ कुतः ॥ क्षिप्रं भवति ध
२ र्मात्मा ॥ देवदेवांशादिष्वेव सैतद्भवति ॥ उक्तं च शाण्डिल्यशाखायां ॥ नाविरतो दुश्चरितान्नासक्तो ना
समाहितः ॥ सम्यग्भक्तो भवेत्कश्चिद्वासुदेवमनाश्रयः ॥ देवपर्ययतादं साश्च भवति कृतज्ञानत इ
ति ॥ अतोन्यः कश्चिद्भवति चेत् डांभिकत्वेन सोनुमेयः ॥ साधारणपापानां सत्संगान्महत्स्वपि सक्तिः क
थं विद्भवति ॥ साधारणभक्तिर्वै नरेषां ॥ स शाठमलिरूपयाति यार्थं तृष्णां तमधमं चेष्टमवैहि नास्य
भक्तिमिति हि श्रीविष्णुपुराणे ॥ साश्रद्दधानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंसामिति च ॥ वे
ना न्र दास्त्वधीता यमलोकनाथ तमं तपो वा मंतमुक्तपूर्वं ॥ पूजां गुरूणां सततं करोमि परस्य गुह्यं न
च क्षिप्रपूर्वं ॥ गुणानि चत्वारि यथागमं मे शत्रौ च मित्रे च समोस्मि नित्यं ॥ तं चापि देवं सततं प्रपन्न
एकांतभावेन भजाम्यजस्रं ॥ एतैर्विशेषैः परिशुद्धसत्वः कस्मान्न पश्येयमनंतमेनमिति मोक्षधर्मे ॥४२॥
आचरस्य साधनत्वोक्तेश्च ज्ञानाभावे सम्यग्भक्त्यसंभवात् ॥ तथा हि गोतमरिवहलेषु ॥ विना

ज्ञानं कुतो भक्तिः कुतो भक्तिं विना रतदिति ॥ भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एकका
ल इति भागवते ॥ ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीताभाष्ये न
वमोध्यायः ॥ ॥ ९ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ उपासनार्थं विभूतीर्विशेषेण कारणत्वं च केषांचिदने
नाध्यायेनाह ॥ म्रियमाणाय स्मृत्वा संतोषं प्राप्नुवते ॥ प्रभवं प्रभावं ॥ मदीयां जगदुत्पत्तिं वा ॥ तद्ध्यालात्त
स्येसृत्युते ॥ यद्यदस्ति तर्हि देवादयो जानंति ॥ सर्वज्ञत्वादतो नास्तीति भावः ॥ अहमादिर्हीति तदुप
त्तिरपि येस्य वशात्कुलस्य जनिरिति ज्ञापनार्थं ॥ अहं सर्वस्य जगतः प्रभवः प्रलयस्तथेति चोक्तं
॥ उक्तं चैतत्सर्वमन्यत्रापि ॥ को अद्धा वेद क इह प्रवोचत्कुत आजाता कुत इयं विसृष्टिः ॥ अर्वाग्देवा अ
स्य विसर्जनेनाथा को वेद यत आबभूवेति ॥ न तस्य भावं मृषयश्च देवा विदुः कुतोन्ये त्वल्पधीत इति प्रमाण
इति ऋग्वेदखिलेषु ॥ अन्यस्तथो यो मामजमिति वाक्यादेव ज्ञायते ॥ अनन्यश्चेष्टयिता आदिश्च सर्वस्य
सनादिः ॥ अजत्वेन सिद्धेरितरस्य ॥ न प्रथयति ॥ बुद्धिरित्यादिना ॥ कार्याकार्यविनिश्चयो बुद्धिः ॥ ज्ञानं प्र
तीतिः ॥ ज्ञानं प्रतीतिर्बुद्धिस्तु कार्याकार्यविनिर्णय इत्यभिधानं ॥ दम इंद्रियनिग्रहः ॥ शमः परमात्म
निष्ठता ॥ शमो मन्निष्ठता बुद्धेर्दम इंद्रियनिग्रह इति भागवते ॥ तुष्टिरलंबुद्धिः ॥ अलंबुद्धिस्तथा तुष्टि

रित्यभिधानात्॥ पूर्वे सप्तर्षयः॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः॥ वसिष्ठश्च महातेजा इ
ति मोक्षधर्मोक्तेः॥ ते हि सर्वपुराणेषूच्यंते॥ चत्वारः प्रथमाः स्वायंभुवाद्यास्तवाइमाः प्रजाः॥ न
हि सर्वविख्यातामिमाः प्रजा इति युक्तो विभागः॥ प्राधान्यं न प्राथमिकत्वादेव भवति॥ गोतमाखि
ल्केषु चोक्तं॥ स्वायंभुवं रोचिषं च रैवतं च तथोत्तमं॥ वेदयः सप्रजावानिति॥ पूर्वेभ्यो ह्युत्तरा जा
यंत इति च तेषां प्राधान्यं॥ अजातेषु ज्येष्ठ्यं॥ तापसस्य भगवदवतारत्वादनुक्तिः॥ तच्च भागव
ते प्रसिद्धं॥ मानसत्वं च सर्वेषां मनूनामुक्तं भागवते॥ ततो मनून्स सर्जाग्रे मनसा लोकभावनानिति
॥ अन्यपुत्रत्वेऽपि परित्यज्यापि च्छरीरं तद्भवति॥ प्रमाणं चोभयविध वाक्यान्यथानुपपत्तिरेव॥ पूर्वे
इति विशेषणाच्चैतत्सिद्धिः॥ मत्तो भावो येषां ते मद्भावाः॥ न एते ब्रह्मणो मानसा जातास्तम एव जा
ता इति भावः॥ संततिं भजंतः केचिदित्याह॥ अहमित्यादिना॥ ब्रह्म परिपूर्णं॥ अथ कस्मादुच्यते प
रं ब्रह्म॥ बृंहति बृंहयति चेति श्रुतेः॥ बहु बहिर्यस्माद्विवितिच पठंति॥ परमं यो महद्ब्रह्मेति च॥ विविधमा
सीदिति विभुः॥ तथा हि वारुणशाखायां॥ विभुः प्रभुः प्रथमं येहनाविर्वृतिइति॥ स ह्येव प्राभवद्धिवि
धो भवदिति॥ सोऽकामयत बहु स्यां प्रजायेयेत्यादि च॥ विभूतयो विविधभूतयः॥ न जायते अर्द

॥४३॥

यतिसंसारमितिजनार्दनः॥ तथाच बाभ्रव्यशाखायां॥ सभूतः स जनार्दन इति॥ सन्न्यासी स
न्यासीत्सोर्दयति विष्णुः सर्वव्यापित्वप्रवेशित्वादेः॥ विषॢव्याप्तौ विश प्रवेशन इति च पठंति॥
गतिश्च सर्वभूतानां प्रजानां चापि भारत॥ व्याप्ता मे रोदसी पार्थ कांतिश्चाभ्यधिका मम॥ अधिभू
तश्च निविष्टश्च तद्विष्णुश्चास्मि भारत॥ क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञित इति मोक्षधर्मे॥
सुखरूपं पाल्यते लीयते च जगदनेनेति कपिलः॥ प्रीतिः सुखं क मानंद इत्यभिधानात्॥ प्राणो ब्र
ह्म कं ब्रह्म खं ब्रह्मेति श्रुतिः॥ ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत्॥ सुखानं
सा ता[illegible]नाल्लापनाच्च यं वेदे वं कपिलमुदाहरंतीति बाभ्रव्यशाखायां॥ आनंदरूपत्वात्पूर्णत्वाल्लो
करमणाच्च रामः॥ आनंदरूपो निष्परिमाण एषः लोकश्चैतस्माद्रमते तेन राम इति शांडिल्यशाखा
यां॥ रश्च अमश्चेति व्युत्पत्तिः॥ आच्छादयति सर्वं वासयति वसति सर्वत्रेति वासुः॥ देवशब्दार्थ उक्तः
पुरस्तात्॥ छादयामि जगत्सर्वं विश्वं भूत्वा सूर्य इवांशुभिः॥ सर्वभूताधिवासश्च वासुदेवस्ततो ह्यह
मिति च मोक्षधर्मे॥ विशिष्टः सर्वस्मादासमंतात्स एवेति व्यासः॥ तथाचाग्नियशाखायां॥ स व्यासो

वीति तम — विसोधरत्वात् सउत्तरतः सपश्चात् सपूर्वस्मात् सदक्षिणतः सउत्तरात् इति ॥ यच्च किं
॥४४॥ चिज्जगत्सर्वं दृश्यते श्रूयतेपि वा ॥ अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति ॥ मया विना
यद्भूतं स्यान्न भास्ति ॥ विश्वरूपे अनंतगते अनंतभाग अनंतगत अनंते इत्यादि मोक्षधर्मे ॥
५५ यद्यद्विभूतिमदिति विस्तरः ॥ विश्वादीनि तत्स्वरूपाण्येव ॥ अन्यानि तु तेजोयुक्तानि ॥ तथा स
पैंगिखिलेषु ॥ विशेषकारुद्रवैन्येंद्रदेवाराजन्याद्या अंशयुता अन्यजीवाः ॥ कृष्णव्यासौ रा
मकृष्णौ नरा मकपिलौ यज्ञप्रमुखाः स्वयं स इति ॥ स एवैको भगवदंशराशि कृष्णाद्यास्त्वंशयु
ता अन्यजीवा इति च गौतमखिलेषु ॥ ऋषयो मनवो देवा मनुपुत्रा महौजसः ॥ कलाः सर्वे हरेरे
व सप्रजापतयः स्मृताः ॥ एते स्वांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमिति च भागवते ॥
कृष्णादीनं शत्वे नोक्ता वराहादीन् स्वरूपत्वेनाह ॥ तु शब्द एवार्थे ॥ अन्यस्तु विशेषो न कुत्राप्यव ॥४४॥
गतः ॥ अंशत्वं तत्राप्यवगतं मुद्रबहीलसनः केशाविति ॥ मृडयंतीति बहुवचनं चायुक्तं ॥ न ह्यंत
रान्यदुक्ता पूर्वमपरामृश्यते क्रियोच्यमाना दृष्टा कुत्रचित् ॥ किमिति वक्ष्यमाणप्राधान्यज्ञापना

र्थं ॥ न तत्कनिष्फलत्वज्ञापनाय ॥ तथा सति नोच्येत ॥ अज्ञात्वैनं सर्वविशेषयुक्तं देववरं को
विमुच्येत बंधादिति च ऋग्वेदखिलेषु ॥ त्वं तु बहुफलप्राप्तियोग्य इति तवेति विशेषणं ॥
दे अन्यस्तु समर्थत्वेन ॥ प्रसिद्धश्चैकत्र किं राद्धः ॥ रागौ[illegible] यदि स्यातां तपसा किं प्रयोजनं ॥
तावुभौ यदि न स्यातां तपसा किं प्रयोजनमित्यादौ ॥ प्राधान्यं च सिद्धमेकत्र दर्शनात्सर्व
त्र भगवद्दर्शनस्य वै यो मां पश्यति सर्वत्रेत्यादौ ॥ ॥ इति श्रीमदानंदतीर्थभगवत्पा
दाचार्यविरचिते श्रीमद्भगवद्गीताभाष्ये दशमोऽध्यायः ॥ ॥ श्रीकृष्णार्पणमस्तु
यथाश्रुते ध्यानं शक्यं तथा स्वरूपस्थितिरनेनाध्यायेनोच्यते ॥ प्रभुः समर्थः ॥ नास्ति
तस्मात्परं भूतं पुरुषाद्वै सनातनादिति मोक्षधर्मे ॥ प्रभुरीशः समर्थश्चेत्यादि चाभिधा
नं ॥ हरिः ॥ सर्वयज्ञादिभागहारित्वात् ॥ इडोपहूतं गेहेषु हरे भागं क्रतुष्वहं ॥ वर्णो मे ह
रितः श्रेष्ठस्तस्माद्धरिरिति स्मृत इति मोक्षधर्मे ॥ सर्वैश्वर्यमयः सर्वैश्वर्यात्मके ॥

सहस्रशब्दोऽनंतवाची ॥ तदपि पाकशासनविक्रम इत्यादिवदाप्यायनार्थमेव ॥ तथा
॥४५॥ हि ऋग्वेदखिलेषु ॥ अनंतशक्तिः परमोऽनंतवीर्यः सोऽनंततेजाश्चलतस्ततोपीति ॥ महा
तात्पर्याच्च प्राबल्यं ॥ न च परिमाणात्तस्मात्किं चित्त्रयोजनं ॥ अनेकशब्दोऽनंतवाची ॥ अ
45 नंतबाहुमिति च वक्ष्यति ॥ सर्वतः पाणिपादं तदित्यादेश्च ॥ विश्वतश्चक्षुरुत विश्वतो
मुखो विश्वतोबाहुरुत विश्वतस्पात् ॥ सं बाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्दे
व एक इति ऋग्वेदे ॥ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुहस्त उत विश्वतस्पात् ॥
सं बाहुभ्यां नमति संपतत्रैर्द्यावापृथिवी जनयन्देव एक यजुर्वेदे ॥ विश्वशब्दश्चानंत
वाची ॥ सर्वं समस्तं विश्वं चाथ अनंतं पूर्णमेवेत्यभिधानात् ॥ अनंतबाहुमनंतरूपं पुरुवक्त्रोमे
कमिति च बाह्वाद्याख्यायां ॥ महत्वाद्युक्तिस्तु तदात्मकत्वेनापि भवति ॥ अन्यथा नादि ॥४५॥
स्प मत्परं ब्रह्मेत्यसाद्ययुक्तं स्यात् ॥ पकत्वनंतान्यरूपाणीत्यनंतरूप ॥ अन्यत्रत्वपरिमाण
इति ॥ उक्तं ह्युभयमपि ॥ परात्परं यन्महतो महांतं ॥ यदेकमव्यक्तमनंतरूपमिति यजु

वेदे ॥ अव्यक्तस्यानंतत्वादेव महतो महत्वेनापरिमेयत्वं सिध्यति ॥ महांतं च समावृत्य प्र
धानं समवस्थितं ॥ अनंतस्य न तस्यांतः संख्यानं चापि विद्यत इत्यादि स पुराणे ॥ तानि
वै कैकानि रूपाण्यनंतानीति वै कूर्मसवति ॥ असंख्याताः ज्ञानकात्स्न्यस्य देहाः सर्वे परी
त णाम विवर्जिताश्चेत्यृग्वेदखिले ॥ यावान्वा अयमाकाशस्तावानेषोंऽर्हृदय आकाशः ॥ उ
भे अस्मिन्द्यावापृथिवी अंतरेव समाहिते ॥ उभावग्निश्च वायुश्च सूर्याचंद्रमसावुभा
विति ॥ कृष्णस्य गर्भजगतोऽतिभरावसन्नपार्ष्णिप्रहारपरिरुग्णफणातपत्रमिति च
भागवते ॥ नचैतदयुक्तं ॥ अचिंत्यशक्तित्वादीश्वरस्य ॥ अचिंत्याः खलु ये भावा न तांस्तर्के
ण योजयेदिति श्रीविष्णुपुराणे ॥ नैषा तर्केण मतिरापनेयेति श्रुतिः ॥ अतिप्रसं
गस्तु महातात्पर्यवशाद्वाक्यबलाज्ञापनेयः ॥ नहि घटवत्कश्चिदपि पदार्थो न दृष्ट इ
त्येतावता प्रमाणदृष्टः स निराक्रियते ॥ केषुचित्पदार्थेषु वाक्यव्यवस्था ॥ अचिंत्यशक्ति
ताभावादंगीक्रियते ॥ गुणाः श्रुताः सुविरुद्धाश्च देवे संत्यश्रुता अपि नैवात्र शंका ॥

श्य चिंत्या अचिंत्याश्च तथैव दोषाः श्रुतौ नात्रैर्हि तथा प्रतीताः॥ एवं वैन्यत्र श्रुतास्श्रुतानां गुणागु
॥४६॥ णानां च क्रमाद्व्यवस्थेति जाबालखिलेषु॥ उपसारत्व परिहाराय नमध्यमिति॥ अन्यथाऽ
व द्यलाभावेनैतत्सिद्धेः॥ विश्वरूपः पूर्णरूपः॥ सविश्वरूपोऽनंतरूपो यतो यं सोनंतो नहिना
५६ शोस्तितस्येति शांडिल्यशाखायां॥ अनलार्कद्युतिमित्युत्पाकेऽमितलवरां क्रमपाकरोति॥
अप्रमेयमिति॥ शशिसूर्यनेत्रमित्यप्यहं क्रतुरित्यादिवत्॥ तदंगजाः सर्वसुरादयोपि त
स्मात्तदंगेभ्य ऋषिभिःस्तुतास्त इत्यृग्वेदखिलेषु॥ चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत
ति॥ बहुरूपत्वात्॥ बह्वाश्रयत्वं चतेषां युक्तं॥ मातापित्रोरंतरंगः स एष एकरूपेणसान्यैः
सर्वगतः स एक इति वारुणश्रुतेः॥ एकेनैव रूपेण द्यावापृथिव्योरंतरं व्याप्तो भवति॥ पश्य
मे पार्थरूपाणीति हि बहूनि रूपाणि प्रतिज्ञातानि॥ मातापितरौ पृथिवीद्यावौ मनो मेतापृ ॥४६॥
थिवी दुर्मतौ धातू॥ मधु द्यौरस्तु नः पितेत्यादिप्रयोगात्॥ ननु नियमतोऽप्ययमदंतस्वरूपं॥ नारद
स्यतद्दर्शनाभावात्॥ केषांचित्तथादर्शयति॥ भगवान् मीयं दिके चित्तस्यरूपदर्शे बिभेति कश्चि

दभ्यसेत्सर्वत्र पिशिरिति वारुणशाखायां॥ नतुतंसर्वे पश्यंति॥ अदृष्टत्वापितन्निरूप्यप्रसयेद्र
ष्टुस्तथा प्रतिभाति॥ तथाच गोलमणिहेषु॥ दृष्टत्वादेवंमोदमानाअदृष्टत्वाप्यतद्वपाद्विभ्यतोदृ
ष्ट्वते॥ पश्यंतितन्यत्वचक्षुर्मुखांस्तु तस्मिन्भवैते मनसोगतत्वादिति॥ धर्मोत्तरज्ञानार्थमेव
कोसवानितिपृच्छति॥ यथाकश्चित्किंचिन्नामादिकंजानन्नपिजातिज्ञानार्थं पृच्छतिकस्त्व
मिति॥ यदितमेवनजानाति तर्हिविष्णाविति संबोधनं नस्यात्॥ त्वमक्षरमित्यादिव॥
कालशब्दोजगद्बंधनछेदनज्ञानादिसर्वसगवद्धर्मवाची॥ कल बंधने। कल छेदने। कल
ज्ञाने। कल कामधेनुरिति पठंति॥ प्रसिद्धश्चस शब्दोभगवति॥ नियतं कालपाशेन बद्धं
शक्रविकत्थसे॥ अयंसपुरुषः श्यामो लोकस्य हरतिप्रजाः॥ बध्वातिष्ठति मारौद्रः प
शून्रशनयायथेति मोक्षधर्मे॥ विष्णुनाबद्धोबलिर्वेति॥ विष्णोर्वाधीश्वरेरितं धार
यन्कालनिग्रहे इतिभागवते॥ प्रबाद्धः परिपूर्णानादिर्वा॥ सतेजसस्यंतासीद्वादिति
श्रुतिः॥ एतद्भूतमनंतमितिच॥ प्रविष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्यस्थविरस्य नामेति॥

महत

व ॥ न तु वर्धनं ॥ नासौ जनानन मरिष्यति नेध्यते सौइति हि भागवते ॥ यस्मादिव्यं हि तद्रूपं
॥४८॥ हीयते वर्धते न चेति मोक्षधर्मे ॥ न कर्मणेति तु कर्मणापि न किम्वयमिति ॥ लोकान्स
माहर्तुमिह विशेषेण प्रवृत्तः ॥ भ्रात्रादीश्चेत्यपिशब्दः ॥ प्रत्यनीकत्वं तु परस्परतया ॥ स
47 र्वेपि न भविष्यंति ॥ अक्षौहिण्यादिभेदेन बहुवचनं युक्तं ॥ योस्याशिरश्छिनत्समौ पातय
ति तच्छिरोस्य तीति तत्पितुर्वराज्जयद्रथोपि विशेषेणोक्तः ॥ स वरा वासवीशक्ति
रिति कर्णः ॥ यदेतद्वक्ष्यमाणं तस्यानयुक्तमेवेत्यर्थः ॥ अग्निषोमात्मकं तेयोमित याज
गद्धर्षणादे हृषीकेशः ॥ केशात्वं त्वं श्रूनातत्रियंत्रतादेः ॥ प्रमाणं तु शशिसूर्यनेत्रमि
यत्रोक्तं ॥ हृषीकाणामिंद्रियाणामीशत्वाच्च ॥ तेषां विशेषत ईशत्वं चेयः प्राणेतिष्ट
भित्यादौ सिद्धं ॥ नमो हृषीकाधिपतेस्पसत्पथे इत्यादि प्रयोगाच्च ॥ इतरार्थो मोक्षध ॥४८॥
र्मे सिद्धः ॥ सूर्याचंद्रमसोः शश्वत्केशैर्मे अंशुसंज्ञितैः ॥ बोधयंस्थापयंश्चैव जगदुत्प
द्यते पृथक् ॥ बोधनात्स्थापनाच्चैव जगतो हर्षसंभवात् ॥ अग्नीषोमकृतैरेभिः क

मर्षिः पांडुनंदन ॥ हृषीकेशोहमीशानो वरदो लोकभावन इति ॥ कथंस्थाने इति तदा
ह कस्मादित्यादिना ॥ पूर्णश्चासावात्मा चेति महात्मा ॥ आत्मशब्दश्चोक्तो भारते ॥ यच्चा
प्नोति यदादत्ते यच्चात्ति विषयानिह ॥ यच्चास्य संततो भावस्तस्मादात्मेति भण्यत इति ॥
तत्परं सदसतोः परं ॥ असच्च सच्चैव च यद्विश्वं सदसतः परं मिति भारते ॥ एकस्त्वमेव का
रयिता ॥ नान्यो स्त्यथापि ॥ स्वकं रूपं तु भ्रांतप्रतीत्या ॥ अन्यथा तदपि स्वकमेव ॥
प्रमाणानि तूक्तानि पुरस्तात् ॥ ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचित श्री
मद्भगवद्गीताभाष्ये एकादशोध्यायः ॥ ॥११॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ अव्यक्तोपा
सना भगवदुपासनस्योत्तमत्वं प्रदर्श्य तदुपायं प्रदर्शयत्यस्मिन्नध्याये ॥ तदुपास
नमपि मोक्षसाधनं प्रतीयते ॥ श्रियं वसाना अमृतत्वमायन् भवंति सत्याः समिधा
मितद्राविति ॥ अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यत इति ॥ अ

व्यक्तंच महतः परं ॥ महतः परमव्यक्तमित्युक्त्वा परामर्शोपपत्तेः ॥ उपास्य तां श्रियमव्य
क्तसंज्ञां ... मर्त्यो मुच्यते सर्वबंधैरिति सामवेदे आग्निवेश्यशाखायां ॥ महच्च साम्यं
॥४८॥ तस्याः वेदे श्रूयते ॥ चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुना निवस्ते ॥ तस्यां
सुपर्णा वृषणा निषेदतुर्यत्र देवा दधिरे भागधेयं ॥ चतुःशिखंडा युवतिः सुपेशा घृत
प्रतीका वयुनानि वस्त इति च ॥ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैरि
त्यारभ्य अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानां ॥ तां मा देवा व्यदधुः पु
रुत्रा भूरिस्थात्रां भूर्यावेशयंती ॥ मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृ
श्रि ण्योत्युक्तं ॥ अमंतवो मां त उपक्षियंति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥ यं कामये तं तमुग्रं कृणो
मि तं ब्रह्माणं तमृषिं तं सुमेधां ॥ अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हंतवा उ ॥ अ ॥४८॥
हं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वंतः समुद्रे ॥ परो दिवा पर एना पृथिव्यैतावती
महिना संबभूवेत्यादिना तपोजुष्ट ऋषिभिः सेवितदेवि तया ब्रह्मागतश्रीरुत तयेति च ॥ इ

तिशंकाकस्यसिद्धवति ॥ अतोज्ञानमपिसूक्ष्मयुक्तिज्ञापनार्थंपृच्छति ॥ एवमिति ॥ ए
वंशब्देनदृष्टश्रुतरूपंमत्कर्मरूदिस्यादिप्रकारस्थ्यपरामृश्यते ॥ अव्यक्तंप्रकृतिः ॥ महतःपर
मव्यक्तमितिप्रयोगात् ॥ यत्तत्रिगुणमव्यक्तंनित्यंसदसदात्मकं ॥ प्रधानंप्रकृतिंप्राहुरवि
शेषंविशेषवदितिभागवते ॥ अक्षरंस्वतत् ॥ अक्षरात्परतःपरइतिश्रुतेः ॥ परंतुब्रह्म ॥
नहिभगवतोऽन्यत् ॥ आनंदमानंदमयावसानेसर्वात्मकेब्रह्मणिवासुदेवइतिभागव
ते ॥ रूपैर्देहसंसाधितंपुरस्तात् ॥ उपासनंवतथैवकार्यं ॥ सहस्रशीर्षापुरुषः सहस्राक्षः
सहस्रपादित्सादिस्थ्य ॥ तमेवंविद्वानमृतइहभवतिनान्यःपंथाअयनायविद्यतइतिसा
ध्यासादादित्यवर्णत्वादिश्चस्वथापवारत्वेनांगीकार्यः ॥ तथाचसामवेदेसौकरायणश्रुतिः ॥
स्त्वाणुर्हवैप्राजापत्यः ॥ सप्रजापतिंपितरमेत्योवाच ॥ मुमुक्षुभिःसाधुभिःफलपापैःकिमुहवे
तारकंतारवाच्यं ॥ ध्यानंसततस्याममरुतःकथंस्यात्ध्येयश्चकःपुरुषात्मोमपादइति ॥ तंहो
वाच ॥ एषवैविष्णुस्तारकात्मोमपादैःध्यानंसततस्याममरुताऽवदामि ॥ सोनंतशीर्षाबहुव

र्णः सुवर्णो ध्येयः सर्वैर्लोहितादिसवर्णः॥ श्यामोथवा हृदये सोष्टबाहुरनंतवीर्योऽनंतबलः
॥४३॥ पुराण इति॥ अरूपत्वादेस्तु गतिरास्का पुरस्तात्॥ पुरुषभेदश्च प्रश्नादौ प्रलीयते॥ त्वांप
र्युपासते॥ येत्वक्षरमित्यादौ॥ सर्वंतु तदुपासकाः एवोत्तमाः॥ इतरेषां किं फलमित्यत आ
५१ ह॥ येत्वित्यादिना॥ अनिर्देश्यत्वं चोक्तं भागवते मायायाः॥ अप्रतर्क्यादनिर्देश्यादिति क
श्यपिनिश्चय इति॥ ईश्वरस्तु देवशब्देनोक्तः॥ देवमन्येऽपरे इत्यत्र॥ उक्तं च सामवेदे काषा
यणश्रुतौ॥ नासदासीन्नो सदासीत्तदानीमिति न महाभूतं नो पभूतं तदासीदिस्थारश्च
तम आसीत्तमसा गूढमग्र इति॥ तमो ह्यव्यक्तमजरमनिर्देश्यमेषा ह्येव प्रकृतिरिति॥
सर्वगोऽचिंत्यादिलक्षणा च सा॥ तथा हि मोक्षधर्मे॥ नारायणगुणाश्रयादजरादतींद्रियाद
ग्राह्यादसंभवतः॥ असत्यादहिंस्राल्लत्नामाद्वितीयप्रवृत्तिविशेषाद्वैरादक्षयादमरादक्षरा
दमूर्तितः सर्वस्याः सर्वकर्तुः शाश्वततमस इति॥ आसीदिदं तमोभूतमप्रज्ञातमलक्षणं॥ अ ॥४३॥
प्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वत इति वामने॥ कूटस्थोक्षर इति वक्ष्यति॥ कूटे आका
शे स्थितः कूटस्थो॥ आकाशसंस्थिता ते पातः कूटस्थिता मतेति ऋग्वेदखिले

षु ॥ सा सर्वगा निश्चला लोकयोनिः सा चाक्षरा विश्वगा विरलस्केति सामवेदगौ
तमशाखायां ॥ कथं तर्हि त्वदुपासकानामुत्तमत्वमित्यत आह ॥ क्लेश इति ॥ अव्यक्ता
ति: दुःखं ह्यवाप्यते ॥ गतिर्मार्गः ॥ अव्यक्तोपासनद्वारको मत्प्राप्तिमार्गो दुःखमाप्यत इ
त्यर्थः ॥ अतिशयोपासने सर्वेंद्रियनियमन सर्वसमबुद्धि सर्वभूतहितरतत्वातिसुष्ठ्वा
चारसम्यग्विष्णुभक्त्यादिसाधनसंदर्भितेनाव्यक्तापरोक्ष्यं ॥ न दतेव न विष्णुप्रसा
दः ॥ सत्यपि तस्मिन्नसम्यग्भवेद्भगवदुपासनमृते ॥ न चैतं मोक्षः विनाव्यक्तोपासनं भ
वत्येव भगवदुपासकानां मोक्ष इति क्लेशिष्ठोयं मार्ग इति भावः ॥ तथाप्यपरोक्षीकृताव्य
क्तानां सुकरं भगवदुपासनमित्येतावत्प्रयोजनं ॥ तत्रापि योव्यक्तोपासके प्रयासः ताव
ताप्रयासेन यदि भगवंतमुपास्ते तु नेन वा तदा भगवदपरोक्षमेव भवतीति द्वितीयम
धिकं ॥ इंद्रियसंयमनाद्यूनभावे सत्युपासकस्यापि देवी नातिप्रसादमेति ॥ देवस्तु तानि सा
धनानि भक्तिमतः स्वयमेव प्रयत्नेन ददातीति चातिसौकर्यमिति भक्तानां भगवदुपासने ॥

इतरत्र क्लेशोऽधिकतरः ॥ तदेतत्सर्वं पर्युपासते ॥ सन्नियम्याधिकतर इति परिसंतरपूर्वशब्दैः
॥५०॥ प्रतीयते ॥ सामवेदे मधुच्छंदसशाखायां चोक्तं ॥ भक्ताश्च ये तीव्रविष्णावतीव विजितेंद्रि
याः सम्यगाचारयुक्ताः ॥ उपासते तं समबुद्धयश्च तेषां देवी दृश्यते न तरेषां ॥ दृष्टा च सा शक्ति
50 मती च विष्णोः सर्वं दत्वोपास्तोः सर्वविघ्नांश्छिनत्ति ॥ उपास्यतं वासुदेवं विदित्वा ततस्ततः शांति
मत्यंतमेति इति ॥ उक्तं च सामवेदे अयास्यशाखायां ॥ प्रसन्नो सविता देवः सोव्यक्तेन सहैव तु
॥ यावत्तावत्प्रसादो हि तावत्तेव न संशयः ॥ न तत्प्रसादमात्रेण प्रीतेयं समहेश्वरः ॥ तस्मिन्प्रीते तु
सर्वस्य प्रीतिरनुभवति ध्रुवं ॥ यद्यप्युपासनाधिक्यं तथापि गुणदो हि सः ॥ मुक्तिदश्च स एवैको
नाव्यक्तादिस्तु कश्चनेति ॥ ममात्मभावमिच्छंतो यतंते परमात्मने इति च मोक्षधर्मे श्रीवचनं
॥ धर्मनित्ये महाबुद्धौ ब्रह्मण्ये सत्यवादिनि ॥ प्रश्रिते दानशीले च सदेव निवसाम्यहमिति
च ॥ महतः परं तु ब्रह्मैव ॥ तथा हि भगवता सयुक्तिकमभिहितं ॥ वदंतीति चेन्न प्राज्ञो हि ॥ त्र ॥५०॥
चैव याणामेवं मुपन्यासः प्रश्नश्चेत्यादि ॥ तमिति पुल्लिंगाच्चेतासिद्धिः ॥ महतः परत्वं तव्यक्तपरस्य
भवत्येव ॥ तथा चाग्निवेश्यशाखायां ॥ अनाद्यनंतं महतः परं ध्रुवमिति ॥ परो हि देवः पुरुहूतो

महत्तरइतीति॥ नचाव्यक्तस्वरूपं भगवता निषिद्धं॥ भारतादौ साधितत्वात्॥ शारीररूप
कविन्यस्तगृहीतेरित्यादौ सांख्यप्रसिद्धं प्रधानं निषिध्य वैदिकमव्यक्तमेवोक्तं॥ तथाचसौक
रायणश्रुतिः॥ शारीररूपिका सा शारीरस्य विष्णोर्यतः प्रियातः सा जगतः प्रसूतिरिति॥ सुव्र
तानां क्षिप्रं महदैश्वर्यं देवी ददाति न देव इति विशेषः॥ सुवर्णवर्णा पद्मकरां वरदे वी सर्वेश्वरी
व्याप्तजटां च बुध्वा॥ सेवेति वै सुव्रतानां तु मासान्महाविभूतिं श्रीर्लुदद्यान्नदेव इत्यृग्वेद
खिलेषु॥ मदुपासकानां भक्तानां न कश्चित्क्लेश इति दर्शयति॥ येत्वित्यादिना॥ उक्तं च सौकरा
यणश्रुतौ॥ उपासते ये पुरुषं वासुदेवं मव्यक्तादेरीक्षितं किंतु तेषामिति॥ तेषामेकांतिनः
श्रेष्ठास्ते चैवानन्यदेवताः॥ अहमेव गतिस्तेषां निराशीः कर्मकारिणामिति मोक्षधर्मे॥ अ
ज्ञानपूर्वादभ्यासाज्ज्ञानमेव विशिष्यते॥ ज्ञानमात्रात्तु सज्ज्ञानं ध्यानं॥ तथाच सामवेदे अनसि
म्लानशाखायां॥ अधिकं केवलाभ्यासाज्ज्ञानं तत्सहितं ततः॥ ध्यानं ततस्त्वपरोक्ष्यं ततः शांति
र्भविष्यतीति॥ ध्यानात्कर्मफलत्याग इति तु स्तुतिः॥ अन्यथा कथमसमर्थोसी युज्येत॥ न

तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यत इति चोक्तं ।। सर्वाधिकं ध्यानमुदाहरंति ध्या
।।५१।। नाधिकं त्यागमती परात्सनू ।। कर्मफलाकांक्षमथो विरागस्त्यागश्च ध्यानं कलाफला न
हीइति काषायणशाखायां ।। वाक्यसाम्यस्य समर्थविषयत्वोक्तेः ।। त्यागस्याभाव इतर
८। त्र प्रतीयते ।। ध्यानादिप्राप्तिकारणत्वाच्च त्यागस्तुतिर्युक्ता ।। केवलध्यानात्फलत्याग
युक्तं ध्यानमाधिकं ।। ध्यानयुक्तत्यागस्यैवात्रोक्तेः ।। अन्यथा कथं त्यागाच्छांतिरनंतरमित्यु
च्येत ।। कथं च ध्यानादाधिक्यं ।। तथा च गौपवनशाखायां ।। ध्यानात्तु केवलात्त्यागयुक्तं त रू
दधिकं स वेदिति ।। नहि त्यागमात्रानंतरमेव मुक्तिर्भवति ।। भवति च ध्यानयुक्तात्तु ।। के
वलत्यागस्तुतिरेवमपि भवति ।। यथानेन युक्तो जेता नान्यथेत्युक्ते ।। सर्वारंभपरित्यागी
। शुभाशुभपरित्यागीत्यादेः सामान्यविशेषव्याख्यानव्याख्येयभावेन पुनरुक्तिः ।। ह ।।५१।।
र्षादिभिर्मुक्त इत्युक्ते कदाचित्क्रमपि भवतीति यो न हृष्यतीत्यादि ।। उपचारपरिहारार्थं
पूर्वं ।। आधिक्यज्ञापनार्थं च लक्षणाभ्यासः ।। ये तु सर्वाणि कर्माणीत्यादेः प्रपंच उपर्यपि जी

रूस्योपसंहरति॥ येतुधर्म्यामृतमिति॥ धर्मोविष्णुस्तद्धेतुत्वाद्धर्म्यं॥ धर्म्यमृत मा
दि संसारनाशकं मिरेभितिधर्म्यामृतं॥ श्रद्धास्तिक्यं॥ अभामास्तिक्यमुच्यतइत्यास्ति
धानं॥ तद्दधानाः श्रद्दधानाः॥ ॥इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्री
मद्भगवद्गीताभाष्ये द्वादशोध्यायः॥ १२॥ श्रीकृष्णार्पणमस्तु॥ ॥ पूर्वोक्तज्ञानज्ञेयक्षे
त्रपुरुषान्पीपिंडीकृत्यविविच्यदर्शयत्यनेनाध्यायेन॥ यद्विकारियेनविकारेणयु
क्तं॥ यतश्चयत्॥ यतोयातिप्रवर्तते॥ सर्वप्रवर्तकः॥ यत्तश्चयदितस्माप्रवर्तते
क्षेत्रमितिवचनं॥ सर्वयइतिस्वरूपमात्रं॥ ब्रह्मसूत्राणिशारीरकं॥ इच्छादयोविका
तिव राः॥ सर्वयत्सप्रभावश्चेयुक्तं तज्ज्ञानसाधनान्याह॥ अमानित्वमित्यादिना॥ आत्मत्व
त्वंज्ञात्वापिमहत्वप्रदर्शनंडंभः॥ ज्ञात्वापिस्वात्मनोल्पत्वंडंभोमाहात्म्यभावनमित्यभिधा
नं॥ आर्जवंमनोवाक्कायकर्मणामवैपरीत्यं॥ सक्तिःस्नेहः सएवातिपक्वोभिष्वंगः॥
॥स्नेहःसक्तिःसएवातिपक्वोभिष्वंगउच्यतइत्यभिधानं॥ तत्त्वज्ञानार्थदर्शनंमपरो

क्षत्तानार्यंशास्त्रदर्शनं ॥ परंब्रह्मेति सत्ययइति प्रतिज्ञानमुच्यते ॥ अन्यच्चसप्तवइति ॥ आ
॥५५॥ दिमद्देहादिविवर्जितं ॥ अनादिमत् ॥ अन्यथा नादीसेवस्यात् ॥ सर्वेंद्रियाणिगुणाश्चाभासयती
ति सर्वेंद्रियगुणाभासं ॥ इंद्रियवर्जितत्वाद्यर्थ उक्तः पुरस्तात् ॥ विकारांतलक्ष्मी वाङ्ज्ञानसाधनं प्रथ
52 मतउक्तं ॥ बहुत्वात्साधनत्वाद्युपयोगात्प्रभावः ॥ यतश्चयदितिवक्तुं प्रकृतिविकारपुरुषा
न्संक्षिप्याह ॥ गुणाःसत्वादयः ॥ तेषामसत्स्वपा विशेषात्त्वय सर्गे विकाराइति पद्यगुक्ताः
॥ कार्याकार्यगुणास्तिस्रायतःस्वत्स्योद्भवौ जनाइति माधुछंदसशाखायां ॥ कार्यशरीरं ॥ शा
रीरंकार्यमुच्यतइत्यभिधानं ॥ कारणानींद्रियाणि भोगानुभवः ॥ सहिचिद्रूपत्वादनुभवइति ॥
प्रकृतिश्चजडत्वात्परिणामिनी ॥ कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः ॥ भोक्तृत्वे सुखदुःखा
नांपुरुषंप्रकृतेःपरमिति भागवते ॥ यदिसाक्ष ॥ उपद्रष्टेति ॥ अनुमंताअन्वनुविशेषतोनिरू ॥५५॥
पकः ॥ पुरुषः सुखदुःखानामितिजीवउक्तः ॥ पुरुषंप्रकृतिमितिजीवेश्वरौसहैवोच्यते ॥ अ
न्यत्रमहातात्पर्यविरोधः ॥ उत्कर्षेहिमहातात्पर्यं ॥ तथाहिसौकरायणश्रुतिः ॥ अवाच्योत्क
र्षेमहत्वात्सर्ववाच्यं ॥ सर्वन्यायानांचमहत्वात्तत्परत्वं ॥ विष्णोरनंतस्यपरात्परस्यतत्त्वापिहस्से

वनत्वात्र शंका ॥ अतो विरुद्धं तु यदत्र मानं तदक्षजादावथवापि युक्तिः ॥ नत स्समाणं क्व
योवदंति न त्वापि युक्तिं न मतिर्हि दृष्टेरिति ॥ अतो युक्तिभिरप्येतदापलापो न युक्तः ॥ अ
तो युथायुक्त्याऽविद्यमानत्वादि कल्पयति साप्याभासरूपेति ॥ संदेनमाहात्म्य वेदे रू
च्यत इति सिध्यति ॥ अवांतरवलात्पर्यं तत्रास्ति ॥ उक्तं च तत्रैव ॥ अवांतरं च तत्परत्वं च सत्वे
महद्वाप्यकत्वात्तु तयोरनंतइति ॥ श्यामत्वाद्यभिधानाच्च ॥ युक्तं च पुरुषमतिकल्पितयु
क्त्यादेराभासत्वं ॥ अज्ञानसंभवात् ॥ ननु स्वतः प्रमाणस्य वेदस्याभासत्वं ॥ अदर्शनं च संभ
वत्येव पुंसां बहूनामप्यज्ञानात् ॥ तर्ह्यस्मदीयमचीनश्रुत्यादौ विपर्ययोपि स्यादिति न वाच्यं
॥ यतस्तत्रैवाह ॥ नैतद्विरुद्धावाचो नैतद्विरुध्यायुक्त इतिह प्रजापतिरुवाच प्रजापति
रुवाचेति ॥ तद्विरुद्धं च जीवस्य सात्म्यं ॥ आभास एवेति चोक्तः ॥ जनमेजय उवाच ॥ बहवः
पुरुषा ब्रह्मन्नुताहो एव तु ॥ कोह्यत्र पुरुषः श्रेष्ठस्तं भवान्वक्तुमर्हति ॥ वैशंपायन उवाच ॥
नैतदिच्छंति पुरुषमेकं कुरुकुलोद्वह ॥ बहूनां पुरुषाणां च यथैका योनिरुच्यते ॥ तथातं

पुरुषंविश्वमाख्यास्यामिगुणाधिकमितिमोक्षधर्मे॥ नचैतत्सर्वंस्वप्नेंद्रियजालवत्॥ वैधर्म्याच्च
॥५३॥ नस्वप्नादिवदितिभगवद्वचनं॥ नचस्वप्नादिवदेकजीवकल्पितत्वेमानंपश्यामः॥ विपर्ययंचमात्
त्वाद्वितीये॥ उक्तंचायास्यशाखायां॥ स्वप्नोहवाअयंसंचलत्वाभवच्चस्वप्नोनहिविच्छेदएतदितीति
नायंदोषः॥ नहीश्वरस्यजीवैक्यमुच्यते॥ जीवस्यहीश्वरैक्यं ह्येतदपिननिरुपाधिकं॥ अतोन
53 प्रतिबिंबत्वविरोधैक्यं॥ तथाचमाधुछंदसश्रुतिः॥ ऐक्यंचापिप्रातिबिंब्येनविष्णोर्जीवस्येत
इबयोवदंतिइति॥ अहंग्रहोपासनेचफलाधिक्यमाग्निवेश्यश्रुतिसिद्धं॥ अहंग्रहोपासकस्यस
साम्यमभ्याशोहवाश्रुतेनात्रशंकेति॥ तदीयोहमितिज्ञानमहंग्रहइतीरितइतिवामने॥ तद्वश्रु
त्वातुसोस्मीतिस्तथैवरेवनतुस्वतइतिच॥ प्रातिबिंब्येनसोस्मिभक्त्याश्वेतिभावना॥ तथाह्यायास्य
शाखायां॥ सत्यस्त्वाहंप्रातिबिंब्येनसोस्मीत्येवंह्युपास्यःपरमःपुमान्सइति॥ प्रातिबिंब्यंचतत्सा
म्यमेव॥ सांख्येनवेदोक्तभगवत्स्वरूपज्ञानेन॥ कर्मिणामपिश्रुताज्ञाताध्यात्वादृष्टिः॥ श्रावकाणांचज्ञा ॥५३॥
ताध्यात्वा॥ सांख्यानांचध्याता॥ तथाचगौपवनश्रुतिः॥ कर्मरुच्चापितच्छ्रुत्वाज्ञात्वाध्यात्वानुपश्य
ति॥ श्रावकोपितथाज्ञात्वाध्यात्वाज्ञान्यपिपश्यति॥ अन्यथातस्यदृष्टिर्हिकथंचिन्नोपजायतइति॥

अन्यइत्यशक्तानामप्युपायदर्शनं॥ पुनश्च प्रकृतिपुरुषेश्वरस्वरूपसांख्याधर्मयुतमाह॥ यावदि
सादिना॥ आत्मानंचाकर्तारंपश्यतिसपश्यति॥ एकस्थंएकस्मिन्नेवविष्णौस्थितं॥ ततएवचवि
ष्णोविस्तारं॥ नचव्ययादित्तस्येत्याह॥ अनादित्वादिति॥ सादिहिप्रायोव्ययिगुणात्मकंच॥ नकरो
तीत्यादेरर्थउक्तःपुरस्तात्॥ नलौकिकःक्रियादिस्तस्य॥ अतोनप्रज्ञामित्यादिवदिति॥ भूतेभ्यः
प्रकृतेश्चमोक्षसाधनममानित्वादिकं॥ ॥ इतिश्रीमद्भगवत्पादाचार्यविरचितेश्रीमद्गीताभा
ष्येत्रयोदशोध्यायः॥ ॥१३॥ ॥ श्रीकृष्णार्पणमस्तु॥ ॥ साधनंप्राधान्येनोत्तरेध्यायेवक्ति॥ मह
द्ब्रह्मप्रकृतिः॥ साचश्रीभूदुर्गेतित्रिन्ना॥ उमासरस्वतीसाद्यास्तुतदंशयुतान्यजीवाः॥ तथाचका
षायणश्रुतिः॥ श्रीभूर्दुर्गामहतीतुमायासालोकसृतिर्जगतोबंधिकाच॥ उमावागाद्या अन्यपत्नी
वास्तदंशास्तदात्मानःसर्ववेदेषुगीताइति॥ ममयोनिरितिगर्भाधानार्थायोनिः॥ नतुमातावाक्ष
शेषात्॥ तथाहिसामवेदेशार्करक्षप्रश्रुतौ॥ विष्णोर्योनिःगर्भसंधारणार्थामाया॥ मायासर्वदुःखै
व विहीना॥ तथाप्यात्मानंदुःखिन्मोहनार्थंप्रदर्शयन्तीसहविष्णुनास्तेति॥ अतःसीतादुःखादिकंस

वं मषाप्रदर्शनमेव॥ तथाच कूर्मपुराणे॥ नत्वेयंप्र॰॥ तथाचसौकरायणश्रुतिः॥ अन्याप्रसूतिरियं तस्य च
॥५४॥ या भूता वमा सा हि भूले कयानिरिति॥ अवाप स्वेच्छयादास्यं जगतां प्रपिता मही साद्यनी पिम्लानश्रुतिः॥
द्व मत्स्यपुराणोक्तमपि स्वेच्छयैव॥ महद्ब्रह्म शब्दवाच्यापि प्रकृतिरेव॥ महती ब्रह्मणी द्वे तु प्र
६५ कृतिश्च महेश्वर इति हि तत्रैव॥ बंधप्रकारं दर्शयति साधनानुष्ठानाय॥ सत्वमिति द्वा
ना॥ तृष्णासंगयोः समुद्भवं तयोः कारणं॥ अज्ञानं जायते यतः तदज्ञानजं॥ प्रमादमोहौ
तमस इति वाक्यशेषात्॥ रजसस्तु फलं दुःखमित्यल्पसुखं दुःखं॥ तथा हि शार्कराक्ष्य
शाखायां॥ रजसो ह्येव जायते मात्रया सुखं दुःखं तस्मात्तानू सुखिनो दुःखिन इत्यास्क्षात
इति॥ अन्यथा दुःखस्यातिकष्टत्वात्तं मोधिकत्वं रजसो न स्यात्॥ परिणामिकर्तारं गुण
भ्यो अन्यं स न पश्यति॥ अन्यथा यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयो ॥५४॥
निमित्तिश्रुतिविरोधः॥ नाहं कर्ता न कर्ता त्वं कर्ता यस्तु सदा प्रभुरिति मोक्षधर्मे॥ आया
न द्वेष्टि न कांक्षति॥ तथा हि सामवेदशाखायां वैयशाखायां॥ रजस्तमः सत्वगुणान्प्रवृत्तान्प्राया
न च द्वेष्टि न चापि कांक्षेत्॥ तथापि सूक्ष्मं सत्वगुणं च कांक्षेद्या दिप्रविष्टे सुतमश्च जहाति

ति ॥ नहिदेवा ऋषयश्च सत्वस्थानपसत्तम ॥ हीनाः सत्वे न सूक्ष्मेण ततो वैकारिकाः स्मृ
ताः ॥ कथं वैकारिको गच्छेत्पुरुषः पुरुषोत्तममिति मोक्षधर्मे ॥ सात्विकः पुरुषव्याघ्र भ
वेन्मोक्षार्थनिश्चित इति च ॥ तुल्यत्वाद्यर्थ उक्तः पुरस्तात् ॥ ब्रह्मवत् प्रकृति बलं भ
गवत्प्रियत्वं ब्रह्मशब्दं ॥ न तु तावत्प्रियत्वं ॥ किं तु प्रियत्वमात्रं ॥ वैको वापि तु मुक्तो वा नर
मात्रप्रियो हरेरिति पाद्मे ॥ अप्यायभावाय ब्रह्मणः मायायाः ॥ ॥ इति श्रीमदानंदतीर्थ
भगवत्पादाचार्यविरचिते श्रीमद्गीताभाष्ये चतुर्दशोध्यायः ॥ ॥ श्रीकृष्णार्पणमस्तु ॥
संसारस्वरूपं तदसयोपायविज्ञानान्यस्मिन्नध्याये दर्शयति ॥ ऊर्ध्वो विष्णुः ॥ ऊर्ध्वः पवित्रो
वाजिनीवसूमत्तमा अस्मि द्रविणं सवर्चसमिति हि श्रुतिः ॥ ऊर्ध्वं उत्तमः सर्वतः ॥ अधो निकृ
ष्टं ॥ शाखाभूतानि ॥ श्वोप्येकप्रकारेण न तिष्ठतीत्यश्वत्थः ॥ तथापि न प्रवाहव्ययः ॥ पूर्व
य ब्रह्मकाले यथा तिष्ठति तथा सर्वत्रापीत्यव्ययता ॥ फलकारणत्वाच्छंदसां पर्णत्वं ॥ नहि
कदाचिदप्यज्ञाने पर्णे फलोत्पत्तिः ॥ अव्यक्तोपि सूक्ष्मरूपेण संततिह्यशरीरादौ संभूतो

नीयधश्चोर्ध्वंच प्रसृताः ॥ गुणैः सत्वादिभिः ॥ प्रतीतिमात्रसुखत्वात्प्रवालं विषयाः ॥ मूलानि
।१५५। भगवद्रूपाणि दीनि ॥ भगवानपि कर्मानुबंधेनैं फलं ददाति ॥ तथास्याल्लवे यशाखायां ॥ हि
ब्रह्मवा अस्य पृथङ्मूलं ॥ प्रकृतिः समूलं ॥ सत्वादयोर्वाचीनमूलं ॥ मूलानि शाखाः ॥ छंदां
55 सि पत्राणि ॥ देवनरतिर्यंचश्च शाखाः ॥ पत्रेभ्यो हि फलं जायते ॥ मात्राः शिफः ॥ मुक्तिः फलममु
क्तिश्च फलं ॥ मोक्षो रसः ॥ मोक्षो रसः ॥ अव्यक्तेश्च शाखा व्यक्ते च शाखाः ॥ अव्यक्ते च मूलं व्य
क्ते च मूलं ॥ एषोऽश्वत्थो गुणालोलपत्रो न स्फीते न क्षीयते ॥ न ह्येष कदाचनान्यथा जायते
नान्यथा जायत इति ॥ यथा स्थितस्तथा नोपलभ्यते ॥ अनादिर्विष्णुः ॥ त्वमादिरंतो जगतो
स्य मध्यमिति भागवते ॥ अनाद्यनंतं परंब्रह्म न देवा नर्षयो विदुरिति मोक्षधर्मे ॥ असंग
शास्त्रेण संगरा हि स सहितेन ज्ञानेन ॥ ज्ञानासिनोपासनया सितेनेति भागवते ॥ छेदस्य
विमर्श एव ॥ तत्स्थितस्यैवाबंधकं भवति ॥ तथा हि मूलस्थं ब्रह्म प्रतीयते ॥ तथोक्तं तच्छुता ।१५५।
वेव ॥ विमर्शो ह्यस्य छेदः ॥ तं न बध्नाति सान्यानीति ॥ तदर्थं च तमेव प्रपद्ये प्रपद्येत ॥ त
थोक्तं तत्रैव ॥ तं वै प्रपद्येत यं वै प्रपद्य न शोचति न हृष्यति न जायते न म्रियते तद्ब्रह्म मूलं ॥

२ कर्षतीत्युक्तेर्जीवस्य स्वातंत्र्यं प्रतीतं॥ तन्निवारयति॥ शरीरमित्यादिना॥ २

तच्छिरसुरिति॥ नारायणेन दृष्टस्तु प्रतिबुद्धो भवेत्पुमान् इति मोक्षधर्मे॥ छेदनोपायो ह्येत्राकांक्षितः॥ नच भगवतोन्यः शरण्योस्ति॥ साधनांतरमाह॥ निर्मानेति॥ स्वरूपं कथयन्ति॥ नतदित्यादिना॥ यत्तु यदा शरीरमवाप्नोति उत्क्रामति जीवः॥ तदेश्वर एतानि गृहीत्वा संयाति॥ यत्र यत्र च संयुक्तो धाता गर्भे पुनःपुनः॥ तत्र तत्रैव वसति न यत्र स्वयमिच्छतीति हि मोक्षधर्मे॥ भावाभावावपि जानन् गरीयो जानामि श्रेयो न तु तत्करोमि॥ आशासु हर्म्यासु हृदासु कुर्वन्यथा नियुक्तोस्मि तथा चरामीति च॥ हत्वापि स पापमघवन्यः कश्चित्पुरुषायते॥ अकर्ता त्वेव भवति कर्ता त्वेव करोति तदिति च॥ तद्यथाहानः सुसमाहितमुत्सर्जद्यायादेवमेवायं शरीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जद्यातीति च श्रुतिः॥ वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामिति च॥ गंधानि च सूक्ष्माणि॥ भोगोस्य साधितः पुरस्तात्॥ इंद्रियद्वारा हि सापि भुंक्ते॥ तद्य इमे वीणायां गायंति एतं ते गायंतीति च श्रुतिः॥

॥ ५६॥ 56

गुणान्वितमेव प्रयुंक्ते॥ नह वै देवान्पापं गच्छतीति श्रुतेः॥ तर्हि किमिति न दृश्यत इत्यत आह
उत्क्रामंतमित्यादिना॥ यतंतो ज्ञानं प्राप्य॥ अकृतात्मानोऽशुद्धबुद्धयः॥ पूर्वोक्तमेव ज्ञानं प्र
पंचयति॥ यदादित्यगतमित्यादिना॥ गां भूमिं॥ वेदनिर्णयात्मिका मीमांसा वेदांतः॥ तथा च
सामवेदे प्राचीनशालश्रुतिः॥ स वेदांतकृत् स कालक इति॥ सह्येव युक्तिसूत्रकृत् सकालक
इतीति॥ क्षरश्च भूतानि ब्रह्मादीनि॥ कूटस्थः प्रकृतिः॥ तथा च शार्कराक्ष्यश्रुतिः॥ प्रजापतिप्र
मुखाः सर्वजीवाः क्षरा अक्षरः पुरुषो वै प्रधानं॥ तदुत्तमं चान्यमुदाहरंति जालं जालं मात
रिश्वानमेकमिति॥ ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गी
ताभाष्ये पंचदशोऽध्यायः॥ ॥ श्रीकृष्णार्पणमस्तु॥ पुमर्थसाधनान्येनाध्यायेन दर्शय न्विरोधीन्य ने
ति॥ तपो ब्रह्मचर्यादि॥ ब्रह्मचर्यादिकं तपः॥ सन्निधानं॥ पैशुनं परोपद्रवनिमित्तदोषा
णां राजादेः कथनं॥ परोपद्रवहेतूनां दोषाणां पैशुनं वचः॥ राजादेस्तु महद्भीतेरदृष्टेर्दर्पउ दा
च्यत इति सन्निधानं॥ लौल्यं रागः॥ रागो लौल्यं तथा रतिरित्यभिधानात्॥ अचापलं स्थैर्यं॥

॥ ५६॥

चपलस्वंचलोस्थिरइतिह्यभिधानात्॥ क्षमातुक्रोधाभावेनसहायकर्तुरनपकृतिः॥ अक्रोधदोषकृच्छ्रः क्षमावान्सनिगद्यतइतिह्यभिधानात्॥ दैवींसंपदमभिजातःप्रतिजातः॥ जगतःसत्यंप्रतिष्ठा॥ ईश्वरंविष्णुःतद्वेपरीसेनाहुः॥ तस्योपनिषत्सत्यस्यसत्यमिति॥ प्राणावैसत्यंतेषामेषसत्यइतिहिश्रुतिः॥ द्वेवावब्रह्मणोरूपेमूर्तंचामूर्तंचस्थितंचयच्चसच्च

स त्यच्चेति॥ तस्योपनिषत्सत्यस्यसत्यमिति॥ एषह्येवैषसाधयतियामपतिवेतितिप्राचीनशाला त

श्रुतिः॥ परस्परसंबद्धवोह्युत्अभावद्वंतिश्रूतानीयादिना॥ दुर्व्यूरोमाहिक्लेशयसेसदेतिहिमोक्षधर्मे॥ मामात्मपरदेहेष्विति॥ नकस्यचिद्विष्णुःकारयितायदिस्यादन्यमापीदानींकारयितित्यादि॥ ईश्वरोयदिसर्वस्यकारकःकारयीतमां॥ अचेतिवादिनंब्रूयात्सदाधोयास्यतीतिहेति॥ सामवेदे याष्कश्रुतिः॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेगीताभाष्येषोडशोध्यायः॥ १६॥ श्रीकृष्णार्पणमस्तु॥ गुणभेदान्प्रपंचयत्यनेनाध्यायेन॥ शास्त्रविधिमुत्सृज्यअज्ञात्वैव॥ वेदःस्त्रोधिगंतव्यःसरहस्योद्विजन्मनेतिविधि

सत्त्वस्थोहिते॥ योवैवेदंन पठंते नचार्थं वेदोक्षितांस्तान्विद्धिसान्त्वनबुद्धीनितिचमाधुच्छंदस श्रु
॥५७॥ तिः॥ अन्यथातामसाइसेवोच्यत॥ ननुविसृज्य॥ यदिसात्विकास्तर्हि नो स्पष्टशास्त्राः॥ नहिवेद
विरुद्धोधर्मः॥ वेदोखिलोधर्ममूलंस्मृतिशीलेचतद्विदामितिहिश्रुतिः॥ वेदप्रणिहितोधर्मो
57 ह्यधर्मस्तद्विपर्ययइतिचभागवते॥ अतोविभज्याह॥ त्रिविधेत्यादिना॥ सत्वानुरूपा चित्तानु
रूपा॥ योयच्छ्रद्धः सएव सः॥ सात्विकश्रद्धः सात्विकइत्यादि॥ कः सात्विकश्रद्ध इति विभज्याह॥ य सादि
कण जंतइत्यादिना॥ भगवद्दर्शनंनामार्जवदृष्टिरेव॥ योवै महांतं परमं पुमांसं नैवद्रष्टाकर्शीकः सो
तिपापीतिह्यनन्तरिक्षानश्रुतिः॥ आसुरोनिश्चयोयेषांतेआसुरनिश्चयः॥ देवास्तुसात्विकाप्रो
क्तादेवाराजसत्तामसाइतिह्याग्निवेश्यश्रुतिः॥ प्रीतिरानंतरिका॥ हृद्यत्वंदर्शने॥ स्थिराश्चन
तदैवप्रध्यापयंति॥ तथाह्याज्यादयः॥ सौम्यत्वमक्रौर्यं॥ अक्रूरःसौम्यउच्यतइत्यभिधानं॥
मौनं मननशीलत्वं॥ बाल्यंचपांडित्यंचनिर्विद्याथमुनिरितिहिश्रुतिः॥ एतेनहीदंसर्वंमतं॥ यद ॥५७॥
नेनहीदंसर्वंमतंतस्मान्मुनिस्तस्मान्मुनिरित्याचक्षतइतिमाल्लवेयश्रुतिः॥ कथंवान्यथामानसंतपः

स्यात् ॥ पुनश्च कर्मादीतिकर्तव्यताविधानार्थमर्थवादमाह ॥ ॐ तत्सदित्यादिना ॥ पर
स्य ब्रह्मणो ह्येतानि नामानि ॥ ॐ तं जगत्यत्र स्वयं संपूर्णो वेदोक्तरूपोऽनुपचारतश्च ॥ सर्वैः
शुभैश्चापि युतोऽन्यान्यैरोतत्सदित्येनमथो वदंतीति ॥ हीति ऋग्वेदखिलेषु ॥ द्वितीयपादस्तच्छ
ब्दार्थः ॥ सदेव सोम्येदमग्र आसीदिति च ॥ ॐ मितिब्रह्मेति च ॥ तेन ब्रह्मणा ॥ आत्मप्रजार्थं ॥ वे
दविधिर्व्यंजनं ॥ मात्रूक्तापुरस्तात् ॥ तत्फलमेस्यादिसनभिधाय ॥ सद्भावशब्देन प्रजननं स्त
वितं ॥ ॐ मित्युक्तानाभिसंधाय फलं ॥ यज्ञदानतप आदिरूतामतिप्रीतेनोमसाम्या
त् ब्रह्मैव निष्पादितं भवतीत्याशयः ॥ तथा च ऋग्वेदखिलेषु ॥ ॐ यज्ञाद्यानिष्फलं क
र्म तत्स्यात्सद्धेतदर्थं कर्म वदंति देवाः ॥ तच्छब्दानां साभिधेयं ब्रह्मप्रीतेस्तद्रूपता ज्ञानि तं
ब्रह्म तस्येति ॥ ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते गीताभाष्ये सप्त
दशोऽध्यायः ॥ १७ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ पूर्वोक्तं साधनं संक्षिप्योपसंहरत्यनेनाध्यायेन
॥ फलानिच्छया अकरणेन वा काम्यकर्मन्यासः सन्यासः ॥ त्यागस्तु फलत्यागएव ॥ तथा

॥५८॥ हि प्राचीनशालस्मृतिः ॥ अनिच्छया कर्मणा वापि काम्यन्यासो न्यासः फलत्याग स्तु त्याग इ
ति ॥ मनीषिण इति विशेषणात्पूर्वपक्षोपि ग्राह्य एव ॥ फलत्यागेन त्यागो विवक्षितो यत्ना
५८ देस्तत्पक्षे ॥ यस्तु कर्मफलत्यागीति च वक्ष्यति ॥ अत एवायं पक्षः ॥ तत्प्रकारं चाह ॥ निश्च
यमित्यादिना ॥ यज्ञस्तेदउक्तो द्रव्ययज्ञ इत्यादिना ॥ दानं तपश्च यदानमंतस्त्वेवेति ॥ एते
षां मध्ये यत्किंचिद्यज्ञादिकं कर्तव्यमेवेत्यर्थः ॥ अन्यथा ॥ ब्रह्मचारी गृहस्थो वा वानप्र
स्थो यतिस्तथा ॥ यदीच्छेन्मोक्षमास्थातुमुत्तमाश्रममाश्रये दित्यादिव्यासस्मृत्यादि
विरोधः ॥ ज्ञानयज्ञविद्यास्त्रयदानब्रह्मचर्यादितपसो हिते ॥ अतो यद्वा चोऽन्यथा प्रती
यते अधिकारिभेदेन योज्यं ॥ अन्यथेतरेषां गत्यभावात् ॥ अन्यस्या गार्थो न युक्त इ ॥५८॥
त्याह ॥ नहीति ॥ त्यागस्तोति ॥ अनिष्टमिति ॥ पुनः सन्यासं प्रपंचयितुं कर्मकारणान्या
ह ॥ पंचेत्यादिना ॥ सांख्ये कृतांते ज्ञानसिद्धांते ॥ अधिष्ठानं देहादिः ॥ कर्ता विष्णुः ॥ स
हि सर्वकर्तृत्वेनोक्तं ॥ जीवस्य यथा कर्तृत्वे प्रमाणमुक्तं ॥ करणमिंद्रियादि ॥ चेष्टाः क्रियाः ॥

हस्तादिक्रियासिद्धिर्होमादिकर्माणि जायंते ॥ ध्यानादेरपि मानसी चेष्टा कारणं ॥ पू-
र्वलिनी चेष्टापि संस्कारकारणत्वेन भवति ॥ दैवमदृष्टं ॥ तथा चायास्यश्रुतिः ॥ देहो ब्र-
ह्मार्थेंद्रिया घाः क्रियाश्च तथादृष्टं पंचमं कर्महेतुरिति ॥ केवलं निष्क्रियं ॥ एनं केवल-
मात्मानं निष्क्रियत्वाद्द्रष्टारं हिहिति तत्रैव ॥ न ज्ञानेंत्तोलि ॥ यस्येति ॥ यस्त्वीपद्ध्यतेस
ईषदहंकारी च ॥ एवं तर्हि न पुरुषमपेक्ष्य विधिः ॥ अकर्तृत्वादित्यत आह ॥ ज्ञानमिति ॥
त्रिविधा कर्मचोदना ॥ एतत्त्रिविधमपेक्ष्य कर्मविधिरिति त्रिविधेत्युच्यते ॥ कारणानि
संक्षिप्याह ॥ करणमिति ॥ कर्मसंग्रहः कर्मकारणसंक्षेपः ॥ अधिष्ठानादिकरण एवां
तर्भूतं ॥ तथा हृग्वेदरिवल्लेषु ॥ ज्ञानं ज्ञेयं ज्ञातानिनंचापपेक्ष्य विधिरुक्षितः ॥ करणं चै-
व कर्ता च कर्मकारणसंग्रह इति ॥ अकर्तृत्वेपि विधिद्वारेश्वरप्रसादादिर्भवत्योक्त ॥
कारणेः कर्मद्वारा पुरुषार्थो भवतीति ॥ ईश्वराधीनत्वेपि विधिद्वारा नियतत्त्वेनैव ॥ यदि
चेष्टादिर्लीयते ॥ तर्हि कारितमेवेश्वरेण ॥ फलं च नियतं ॥ वस्तुतोऽकर्तृत्वेपि भ्रांतिमानि

कं कर्तृत्वं तस्यैव ॥ स्वातंत्र्यं च जडमपेक्ष्येति च प्रवृत्ति विधिवैयर्थ्यं ॥ सर्वं चैतदनुसन्धो
न्तृ प्रमाणसिद्धमिति न पृथक् प्रमाणमुच्यते ॥ पुनः साधनप्रधनायगुणभेदानाह ॥ ज्ञा
॥५९॥ नमित्यादिना ॥ गुणसंख्याने गुणगणनप्रकरणे ॥ एकं सात्त्वं विष्णुं ॥ परकृतं दोषं दीर्घ
59 कालकृतमप्यनुचितं यः सहते सदीर्घसूत्री ॥ परेण यः कृतो दोषो दीर्घकालकृतो
पिवा ॥ यस्तस्य सहकोदोषानू दीर्घसूत्री स उच्यत इत्यभिधानात् ॥ यथार्थत्वनिय
माभावो राजस्याः ॥ अन्यथा तामस्याभेदाभावात् ॥ नैष्कर्म्यसिद्धिं नैष्कर्म्यफलं यो
गसिद्धिं ॥ यथा येनोपायेन सिद्धिं प्राप्तो ब्रह्माप्नोति तथा निबोध ॥ यासिद्धिर्ज्ञानस्य
परानिष्ठा ॥ ब्रह्मभूयाय कल्पते ब्रह्मणि भावो ब्रह्मभूयं ब्रह्मणि स्थितिः सर्वदा तन्म
नस्कतेत्यर्थः ॥ पुनरंतरंगसाधनान्युक्त्वोपसंहरति ॥ सर्वकर्माणीत्यादिना ॥ परोक्ष
वचनं तु द्रोणं प्रति भीमवचनवत् ॥ धर्मत्यागः फलत्यागः ॥ कथमन्यथा युद्धविधिः ॥५९॥
यस्तु कर्मफलत्यागी सत्यागीत्यभिधीयत इति चोक्तं ॥ ॥ पूर्णादोषमहाविष्णो

गीतामाश्रित्य लेशतः निरूपणं कृतं तेन प्रीयतां मे सदा विभुः ॥ ॥ इति श्रीमदानंद
तीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता
भाष्ये अष्टादशोध्यायः ॥ ॥ १८ ॥ ॥ संपूर्णं श्रीकृष्णार्पणमस्तु ॥ ॥ ॐ ॥ ॐ ॥

60

ॐ श्रीमद्भगवद्गीताभाष्यं संपूर्णं श्री ॐ